इत्यादिश्रुतेर्ज्ञानस्य प्राचीनकर्म्मनाशकत्वमेवोचितम्, दाहकत्वं कथमिष्यते इति चेत्।

अहम् प्रकृत्यादिभ्यः भिन्न इत्येवंरूपेण विवेकेन साक्षात्कृते। "ज्ञानस्य"= विवेकेनात्मसाक्षात्कारस्य। "प्राचीनकर्म्म" इत्यनेन पूर्वपक्षिमते प्रारब्धातिरिक्तं विवेकज्ञानात् पूर्वं सञ्चितं पूर्वभवीयम् ऐहिकञ्च कर्म्म उच्यते। नाशकत्वम्=ध्वंसकारणत्वम्। अत्र सिद्धान्तिमते,—अविशेषात् सर्वेषामेव कर्म्मणां सहकार्य्युच्छेदेन दाहः, अनारब्धफलकानां विवेकसाक्षात्कारात्पूर्वं सञ्चितानां विवेकज्ञानसमानकालीनानां वा कर्म्मणां सहकार्य्युच्छेदेन शक्तिनाशरूपदाहाद् दग्धबीजानामङ्कुराजनकत्ववद् विपाकानारम्भकत्वम्, आरब्धफलकस्य तु प्रारब्धकर्म्मणः फलस्य जात्यादेर्विपाकस्य जातत्वाद् न तेषां शक्तिनाशेन फलानारम्भकत्वं सम्भवति; यथा किञ्चित् लक्ष्यमुद्दिश्य शरीरशक्त्या निक्षिप्तस्य इषोः लक्ष्यभेदात् प्राक् वेगस्य निवृत्तिः कर्त्तुं न शक्यते लक्ष्यभेदानन्तरन्तु वेगः स्वयमेव निवर्त्तते, एवं प्रारब्धकर्म्मणां शक्त्या आरब्धस्य जात्यादेः कर्म्मजन्यभोगसमाप्तेः पूर्वं न तत्कर्म्मशक्तिनाशरूपदाहेन नाशः कर्त्तुं शक्यते, भोगसमाप्त्यनन्तरं तु स्वयमेव निवर्त्तते, न तद्विपाकनिवृत्त्यै कर्म्मनाशार्थं प्रयत्नान्तरम् अपेक्ष्यते। तानि हि कर्म्माणि यावद्भोगमवस्थाय क्षीयन्ते। "नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि"तिवचनमपि प्रारब्धकर्म्मविषयमेव, अन्येषां भोगाजनकतया तथाश्यत्वाभावात्। "ज्ञानाग्निः सर्वकर्म्माणि भस्मसात् कुरुतेऽर्जुन" "योगाग्निदग्धकर्म्मचयोऽचिराद्" इत्यादिवचनन्तु साधारणकर्म्मविषयम्। तदेकवाक्यतया "क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे" इतिश्रुतिवाक्यमपि साधारणकर्म्मदाहप्रतिपादकम्। सर्वमेतदग्रे स्फुटीभविष्यति। अत्र तु पूर्वपक्षिमतमनुसृत्य पूर्वपक्षानुकूलतया विवेकज्ञानस्य प्रारब्धातिरिक्तकर्म्मनाशकतया "क्षीयन्ते" इत्यादिश्रुतिवाक्यं व्याख्यातम्। अत्र-पूर्वपक्षिमतेऽयं विशेषो बोध्यः,—"तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये" इत्यादि श्रुतिः (अस्याः अर्थः,—तस्य विवेकिनः तावदेव चिरं=देहधारणं, यावन्न विमोक्ष्ये=न विमोक्ष्यते प्रथमपुरुषार्थे उत्तमपुरुषः छान्दसः। येन कर्म्मणा शरीरमारब्धं तस्योपभोगेन क्षयाद् देहपातं यावद् इत्यर्थः। अथ तदैव सत् सम्पत्स्ये=सम्पत्स्यते इति पूर्ववत् छान्दसः उत्तमपुरुषः। मोक्षम्

न, "ज्ञानाग्निदग्धकर्म्माणं तमाहुः पण्डितं बुधाः" इत्यादिवाक्यैर्दाहस्यापि श्रवणेन लाघवाद् दाहपरत्वस्यैव नाशादिवाक्येष्वपि कल्पनौचित्यात् ।

एष्यति इत्यर्थः । प्रारब्धसमाप्त्या देहपातकाले एव विदेहकैवल्यप्राप्तिः नतु प्रारब्धसमाप्तेः पूर्वमिति समुदितार्थः ।) जीवन्मुक्तिप्रतिपादिकाः श्रुतिस्मृतयश्च ज्ञानस्य प्रारब्धकर्म्मनाशकत्वे बाधिकाः सन्ति । अतः कर्म्मणां ज्ञाननाश्यत्वप्रतिपादकं "क्षीयन्ते" इत्यादिश्रुतिवाक्यं प्रारब्धातिरिक्तकर्म्मनाशकत्वपरमिति कल्पनीयम्, सामान्यशास्त्रस्य विशेषशास्त्रेण बाधात् । अतः पूर्वपक्षिमते "क्षीयन्ते चास्य कर्म्माणी"ति श्रुतेः प्रारब्धातिरिक्तकर्म्मणां ज्ञानेन संक्षयः, प्रारब्धस्य तु भोगादेव क्षय इत्यर्थसंक्षेपः ।

सोपपत्तिकं सिद्धान्तं कथयिष्यन् पूर्वपक्षं निषेधति,—'ने'ति, विवेकज्ञानस्य कर्म्मनाशकत्वकल्पनं नोचितम्, अपि तु कर्म्मदाहकत्वकल्पनमेव युक्तमिति सिद्धान्तगर्भितः नञोऽर्थः । सिद्धान्ते ज्ञानस्य कर्म्मदाहकत्वकल्पने उपपत्तिमाह,— "ज्ञानाग्निदग्धे"ति । "ज्ञानाग्निना"—विवेकसाक्षात्कारात्मकेन वह्निना "दग्धानि"—सहकारिक्लेशपञ्चकोच्छेदेन शक्तिप्रतिबन्धाद् विपाकरूपफलजननासमर्थानि अग्निसंयोगाद् अङ्कुरजननासमर्थानि बीजानीव कृतानि कर्म्माणि यस्य तं विवेकिनं, "पण्डितं"—विवेकबुद्धिसम्पन्नं । "बुधाः"—पण्डिताः । आहुरित्यर्थः । "इत्यादी"ति आदिशब्देन "ज्ञानाग्निः सर्वकर्म्माणि भस्मसात् कुरुतेऽर्जुन" इत्यादिवाक्यानि गृह्यन्ते । "दाहस्यापी"ति अपिशब्दात् कुत्रचित् "क्षीयन्ते चास्य कर्म्माणी"त्यादौ आपाततः क्षयार्थप्रतीतिः सूच्यते । "लाघवात्"—लाघवतर्कानुगृहीतयुक्तेः । "दाहपरत्वस्यैव"—अविद्यादिसहकार्य्युच्छेदरूपदाहार्थतात्पर्य्यकत्वस्यैव, नाशार्थकशब्दानामित्यर्थः । "एव"कारेण नाशार्थो व्यावर्त्यते । "नाशादिवाक्येष्वपि"—ज्ञानेन कर्म्मणां नाशक्षयादिप्रतिपादकतया आपाततः प्रतीतेषु श्रुतिस्मृतिवाक्येषु अपि । "अपि"शब्देन दाहप्रतिपादकवाक्यैरेकवाक्यता सूच्यते ।

अस्यायमाशयः,—विवेकज्ञानस्य अविवेकापराभिधाऽविद्यानाशे एव सामर्थ्यं "नेदं रजतमि"त्यादौ रजतभेदज्ञानाद् रजताभेदज्ञानस्य नाशदर्शनाद् लोकादवगतम्, अतोऽत्रापि विवेकज्ञानस्य अविवेकाख्याविद्यानाशकत्वमेव कल्पनीयम्,

कर्म्मणां दाहश्च क्लेशादिसहकार्य्युच्छेदेन नैष्फल्यम् ।
कर्म्मणां नाशस्तु प्रारब्धभोगान्ते चित्तनाशादेव भविष्यति ॥

कर्म्मणां नाशे च भोगस्यैव हेतुतया "नाभुक्तं क्षीयते कर्म्मे"त्यादिशास्त्रादवगतेः न कर्म्मक्षये ज्ञानस्य कारणताकल्पना युक्ता, अन्यथा कर्म्मणां नाशं प्रति ज्ञानं भोगश्चेति कारणद्वयं कल्पनीयं, तथाच गौरवम्, तच्च अप्रामाणिकतया अन्याय्यम् । अविद्याद्युच्छेदे ज्ञानस्य कारणताकल्पने तु न अप्रामाणिककल्पना प्रागुक्तयुक्तिश्रुत्यादिप्रामाण्याद्, नापि कर्म्मक्षये कारणद्वयकल्पना, भोगस्यैव एकस्य कर्म्मनाशकत्वसिद्धेः । अपि च ज्ञानोत्तरं भोगेन प्रारब्धक्षयानन्तरं प्रकृतेरधिकारनिवृत्त्या चित्तलयस्य अवश्यम्भाव्यतया तल्लयेन तद्धर्म्माणां लयस्य सिद्धेश्च न ज्ञानस्य तन्नाशकत्वकल्पनं युक्तमिति । अतः "क्षीयन्ते चास्य कर्म्माणी"त्यादि-श्रुत्युक्तनाशार्थकशब्दानां दाहतात्पर्य्यकत्वस्यैव निश्चयाच्च प्रागुक्तविरोध इति प्रतिवचनार्थः ।

अमूर्त्तानां कर्म्मणां मुख्यदाहकर्म्मत्वम् नोपपन्नमित्याशङ्क्य दाहकर्म्मत्वोपपत्तये स्वयमेव सिद्धान्ताभिमतदाहशब्दार्थमाह,—"कर्म्मणां दाहश्चे"ति । यथा तुषावनद्धान्येव बीजानि अङ्कुरमुत्पादयितुं प्रभवन्ति नाग्निना दग्धतुषाणि, एवं क्लेशसहकृतान्येव कर्म्माणि विपाकारम्भे समर्थानि, नतु विवेकाग्निना दग्धक्लेशानि । अतएव शक्तिनाशाद् दग्धबीजकल्पानि कर्म्माणि न विपाकप्रसवाय अलम् । अतः स्वरूपतः विद्यमानानि अपि तानि फलाजनकत्वाद् दग्धानीत्युच्यते, इति । तत्रायं क्रमः,—आदौ क्रियायोगेन तनूकृताः क्लेशाः दग्धेन्धनकल्पाः जायन्ते, ततो विवेकख्यातिरूपेण वह्निना संदह्यन्ते, क्लेशानां दाहाच्च तुषदाहाद् बीजानामिव कर्म्मणां दाहः सम्पद्यते, ततश्च दग्धबीजानाम् अङ्कुरानुत्पादवत् कर्म्मणां विपाकानुत्पादः । अतएव तेषां नैष्फल्यमिति । तदुक्तम् स्मृतौ

बीजान्यग्न्युपदग्धानि न रोहन्ति यथा पुनः ।
ज्ञानदग्धैस्तथा क्लेशैर्नात्मा सम्पद्यते पुनः ॥

इति । ज्ञानदग्धैः क्लेशरूपैः बीजैः हेतुभिः आत्मा=देहो न पुनरुत्पद्यते इत्यर्थः । 'कर्म्मणां' मुख्यतः दाहकर्म्मत्वाभावेऽपि दग्धबीजसादृश्याद् दाहकर्म्मत्वमुपचर्य्यते इति भावः । क्लेशानां कर्म्मसहकारित्वे प्रमाणभूतानि श्रुतिस्मृतिसूत्राणि प्रागेवोदाहृतानि, विवेकख्यातेः क्लेशादिदाहकत्वं चोक्तम्, "विवेकख्यातिरविप्लवा हानोपाय"इति पातञ्जलसूत्रेण । अविप्लवा=साक्षात्कारनिष्ठावतीत्यर्थः ।

अतो लोकसिद्धेनाविद्यानाशेनैव द्वारेण कर्म्मफलानुत्पत्तिसम्भवाद्

विवेकज्ञानेन कर्म्मणां नाशाभावे विवेकिनोऽपि कदाचिद् योगिसंकल्पादिना दग्धबीजस्याङ्कुरजनकतावद् दग्धकर्म्मणोऽपि विपाकोत्पत्तिः स्यादित्याशङ्क्य कर्म्मणां नाशहेतुमाह,–कर्म्मणां "नाशस्त्वि"ति,–विवेकोत्तरं प्रारब्धकर्म्मणा साधिकारं चित्तं जीवन्मुक्तस्य भोगं जनयति, भोगसमाप्तौ भोगापवर्गयोः पुरुषार्थयोः कृतत्वाद् निवृत्ताधिकारं चित्तं प्रतिलोमपरिणामेन स्वकारणे लीयते, चित्तलयाच्च तद्धर्म्माणां कर्म्माशयानां लयः सिद्ध्यति; धर्म्मिनाशस्य धर्म्मनाशप्रयोजकतायाः प्रमाणसिद्धत्वात् । नहि धर्म्मिणमनाश्रित्य धर्म्माणां स्थितिः प्रमाणपदवीमधिरोहति; गोत्वादीनां तु तत्तद्व्यक्तिरूपधर्म्मिनाशेऽपि स्वाश्रयभूतधर्म्म्यन्तरसत्त्वाद् न एकधर्म्मिनाशे नाशः । अतः कर्म्मनाशार्थे नापेक्षा विवेकादिरूपव्यापारान्तरस्य । वस्तुतः, "नासतो विद्यते भावो नाभावो विद्यते सतः ॥" इत्यादिस्मृतिप्रामाण्यात् सांख्यनये लयातिरिक्तः नाशो नाङ्गीक्रियते । लयश्च कारणे धर्म्मिणि धर्म्मस्यातीतावस्थयाऽवस्थानम् । अतः सहकर्म्मणा बुद्धिलये कर्म्मणामतीताध्वनि प्रवेशाद् न योगिसंकल्पादिभिः तस्य पुनरुत्थानम्, नवा अर्थक्रियाकारिता तस्याध्वनः चरमत्वात् । दग्धबीजभावानां क्लेशानां चित्तलयेन हेयत्वमुक्तम् पातञ्जलसूत्रे "ते प्रतिप्रसवहेयाः सूक्ष्माः" इति । प्रसवाद् विरुद्धः प्रतिप्रसवः=प्रलयः, प्रतिप्रसवेन=चित्तस्य प्रलयेन सूक्ष्माः=दग्धबीजभावाः क्लेशाः कर्म्माशयाश्च हेया इति तदर्थः ॥

प्रकृतसिद्धान्तमुपसंहरति,–अत इति, "अतः"=विवेकज्ञानस्य प्रागुक्तयुक्त्या कर्म्मनाशकत्वाभावाद् । "लोकसिद्धेन"=शुक्तिरजतादौ प्रत्यक्षादिप्रमाणतः ज्ञानस्याज्ञानविरोधितायाः दर्शनाद् निश्चितेन । "अविद्यानाशेन"=अविवेकस्य बाधरूपेण । 'एव'कारेण कर्म्मणां नाशो व्यावर्त्यते, नतु कर्म्मनाशेनेत्यर्थः "द्वारेण"=व्यापारेण । "कर्म्मफलानुत्पत्तिसम्भवात्"=कर्म्मसाध्यविपाकरूपफलानारम्भस्य युक्तिसिद्धत्वात् । "गौरवात्"=कार्य्यकारणभावे कल्पनागौरवदोषात् । कर्म्मनाशं प्रति भोगस्य कारणता, प्रारब्धातिरिक्तकर्म्मनाशं प्रति ज्ञानस्य कारणतेति द्विविधकारणताकल्पनं, प्रारब्धातिरिक्तेति प्रतियोग्यादिघटितभेदकल्पनं चेति महद् गौरवम् । दाहार्थत्वे तु केवलं भोगस्यैव चित्तलयद्वारेण कर्म्मनाशकत्वकल्पनमिति लाघवमिति प्रपञ्चितं प्राक् ।

न ज्ञानस्य कर्म्मनाशकत्वं गौरवादित्यादिकं योगवार्त्तिके प्रपञ्चित-मस्माभिरिति दिक् ।

संक्षिप्तेनानेनोत्तरेणापरितुष्यतां विस्तरार्थिजिज्ञासूनां प्रीतये स्वकृत-योगवार्त्तिकग्रन्थदर्शनाय उपदिशति "योगवार्त्तिके" इति । अयं च पातञ्जल-सूत्राणां वेदव्यासकृतभाष्यस्य व्याख्यानभूतः ग्रन्थविशेषः ।—वार्त्तिकलक्षणन्तु "उक्तानुक्तदुरुक्तादिव्याख्या यत्र प्रवर्त्तते ; तं ग्रन्थं वार्त्तिकं प्राहुः वार्त्तिकज्ञा मनीषिणः" इति । अस्माभिस्तु विशेषजिज्ञासूनाम् औत्सुक्यनिवृत्तयेऽत्र वार्त्तिकोक्तविचारः उद्ध्रियते,—

"अविद्यादिषु सूत्रे (सति मूले तद्विपाको जात्यायुर्भोगा इत्यत्र) भाष्यकृता कर्म्माशयस्यापि प्रसंख्यानदग्धबीजभावस्य वक्तव्यतया कर्म्माशयस्य दाह एव ज्ञानेन क्रियते, न तु नाश इत्यवधार्य्यते । स च क्लेशाख्यसहकार्य्युच्छेद एव । ज्ञानस्य हि व्यापारद्वयम्, क्लेशाख्यहेतूच्छेदेन कर्म्मानुत्पादः प्राचीनकर्म्मणां दाहश्च ; न तु कर्म्मनाशः, प्रारब्धकर्म्मणोऽपि नाशप्रसङ्गात् । न च प्रारब्धातिरिक्तकर्म्मत्वेन ज्ञाननाश्यता कल्प्येति वाच्यम्, लाघवेन क्लेशस्यैव विपाकारम्भहेतुत्वकल्पनौचित्यात् । प्रारब्धफलकस्य कर्म्मणो बीजशक्तिनाशेऽपि फलं समाप्यते एव बीजदाहेऽपि उत्पन्नाङ्कुरवदिति । अतएव "ज्ञानाग्निदग्धकर्म्माणं तमाहुः पण्डितं बुधाः ।" "योगाग्निदग्धकर्म्मचयोऽचिराद्दि"ति गीताविष्णुपुराणयोर्ज्ञानयोगाभ्यां कर्म्मणो दाह एव श्रूयते, नतु नाश इति । तदेकवाक्यतया च क्षीयन्ते चास्य कर्म्माणीत्यादिवाक्यानि अपि दाहपराण्येव । तथा "तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ।" ४ । १ । १३ (यथोक्तसाधनैः तदधिगमे आत्मसाक्षात्कारे सति उत्तरस्याघस्याश्लेषः अनुत्पत्तिः पूर्वस्य चोत्पन्नस्य विनाशो भवति क्लेशाख्यसहकार्य्युच्छेदेन विपाकारम्भासमर्थो भवति, तद्व्यपदेशात् श्रुतिस्मृत्यादिभिः तदर्थस्य उपदेशादिति ब्रह्ममीमांसासूत्रार्थः ।) इति ब्रह्मसूत्रेऽपि विनाशशब्दः निष्फलार्थक एव मन्तव्यः । कर्म्मनाशस्तु ज्ञानवासनानाशवत् चित्तनाशादेव भवति । धर्म्मिनाशस्य धर्म्मनाशहेतुतायाः सामान्यत एव क्लृप्तत्वादिति । तस्माज्ज्ञानेन क्लेशाख्यहेतुदाहात् कर्म्मानुत्पादवत् प्राचीनकर्म्मविपाकानारम्भोऽपि भवति, क्लेशाख्यादृष्ट-सहकार्य्यभावात् । अतो ज्ञानात् क्लेशाख्यसहकार्य्युच्छेद एव कर्म्मदाह इति सर्वं सुस्थमिति ।"

तस्माद् विवेकसाक्षात्कारादविद्यास्मितारागादिक्लेशनिवृत्तौ त्रिविध-दुःखात्यन्तनिवृत्तिरूपपरमपुरुषार्थः सिध्यतीत्युपपन्नम् । तथाच योग-

---

परिच्छेदार्थमुपसंहरति,—"तस्मादि"ति । "तस्मात्"—आत्मनो विवेकेन साक्षात्कारेण अविद्यादिनिवृत्त्या त्रिविधदुःखानुत्पादतो दुःखात्यन्तनिवृत्तिरूप-मोक्षस्य उपपादनाद् इत्यर्थः । शुक्तिरजतादौ प्रत्यक्षात्मकप्रमाज्ञानादेव तादृश-भ्रमनिवृत्तेः, दिग्मोहादौ अप्रत्यक्षात्मकप्रमाज्ञानात् प्रत्यक्षात्मकभ्रमस्य अनिवृत्तेश्च दर्शनात् तुल्यरूपयोरेव ज्ञानाज्ञानयोः विरोधोपपत्तेः, "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्चे"त्यादिश्रुतौ श्रवणमननयोरनन्तरं तत्सा-ध्यस्य "द्रष्टव्य" इत्यनेन साक्षात्कारस्योपदेशाच्च प्रत्यक्षप्रमात्मकविवेक-ज्ञानस्यैव प्रत्यक्षभ्रमात्मकाविद्यानिवृत्तिसामर्थ्यमिति निश्चीयते, इत्यतः "साक्षात्कार"पदोपादानम् । "अविद्या"—मिथ्याज्ञानम्, अविद्यादीनां लक्षणन्तु प्रागेव उक्तम् । "निवृत्ति"श्च विवेकसाक्षात्कारेण दाहः, अप्रसव-धर्म्मतासम्पादनमिति यावत् । परमपुरुषार्थत्वमस्य "न च पुनरावर्त्तते" इत्यादिश्रुतेः, ध्वंसस्य नित्यतया आत्मनः स्वरूपेणावस्थानस्य सदातनत्वेन च सिद्धम् ।

दुःखोत्पादस्य हेयत्वे योगसूत्रं प्रमाणयति, "हेयं दुःखमनागतमि"ति अतीतदुःखं भोगेनातिवाहितमिति तद्धानं सिद्धतया न पुरुषार्थः, तथा वर्त्त-मानमपि स्वसत्ताकाले भुज्यत एवेति त्यक्तुं न शक्यते, स्वोत्तरोत्पन्नगुणेन च तृतीयक्षणे स्वयमेव नङ्क्ष्यतीति तद्धानार्थः प्रयासो विफलः, अतः अनागतं—सूक्ष्मरूपेण अनागतावस्थया चित्ते विद्यमानमेव संसारदुःखं हेयम्, कारणोच्छे-दाद् अनुत्पादार्हतासम्पादनेन त्यक्तव्यमित्यर्थः । कारणविघटनमुखेन प्राग-भावपरिपालनमिति न्यायवित्समयः । तद्धानञ्च समवायसम्बन्धेन यद्यपि पुरुषे नित्यसिद्धम् तथापि भोग्यतारूपस्य सम्बन्धेन धनादीनामिव तद्धानं न नित्य-सिद्धमिति तेन सम्बन्धेन तद्धानं पुरुषार्थः इत्याशयः ।

अनागतदुःखहानौ विवेकज्ञानस्य हेतुत्वे योगसूत्रम् प्रमाणयति,—"विवेकख्यातिरि"ति—पुरुषगुणभेदविवेकस्य या ख्यातिः—प्रख्या—ज्ञानम्, अवि-प्लवा—विगतः अन्तरा व्युत्थानरूपः विप्लवो यस्याः सा साक्षात्कारनिष्ठावती विवेकख्यातिः हानस्य दृश्यपरित्यागस्य उपायः । इति अपरसूत्रार्थः ।

सूत्रद्वयम् "हेयं दुःखमनागतम्" । २ । १६ ॥ "विवेकख्यातिरविप्लवा हानोपायः" २ । २६ । इति ।

इति श्रीविज्ञानभिक्षुविरचिते सांख्यसारेऽभ्यर्हितत्वादादौ विवेकख्याति-फलस्य परमपुरुषार्थस्य परिच्छेदः ।

प्रथम "इति" शब्दः सूत्रोद्धारसमाप्तिसूचकः, द्वितीयश्च अध्यायार्थ-समाप्तिद्योतकः । "विज्ञानभिक्षु" इति ग्रन्थकृतः स्वनामकथनम् । "सांख्यसार" इति व्याख्येयग्रन्थनाम । मोक्षस्य तत्साधनानां च आदौ कथने हेतुमाह,-"अभ्यर्हितत्वादि"ति-पूजार्हत्वादित्यर्थः । मोक्षस्य पुरुषार्थान्तरा-पेक्षया उत्कर्षात् नित्यत्वाद् निरतिशयत्वाद्दुःखासंभिन्नत्वाच्च परमोत्कृष्ट-त्वादभ्यर्हितत्वम् । मोक्षस्य साधनं फलत्वञ्च दर्शयति "विवेकख्यातिफल-स्ये"ति । विवेकख्यातिः-परवैराग्यसाध्यगुणपुरुषान्तरविज्ञानं, तच्च दिव्यादिव्य-सकलविषयसुखेभ्यः-पुरुषार्थं प्रवृत्तायाः प्रकृतेः परिणामभूतेभ्यः उत्कृष्टं, तदुक्तं "यच्च कामसुखं लोके यच्च दिव्यं महत् सुखं । तृष्णाक्षयसुखस्यैते नार्हन्ति षोडशीं कलामि"ति । ततोऽपि उत्कृष्टः मोक्ष इति सर्वेभ्योऽस्य उत्कर्षादयं परमपुरु-षार्थः । अतो मोक्षार्थं सर्वथा सर्वैः यतनीयमिति भावः । परमार्थतो यद्यपि चितेः स्वरूपेणावस्थानलक्षणः अभावस्याधिकरणानतिरिक्ततया दुःखात्यन्तध्वंसरूपो वा मोक्षो न कस्यापि साधनस्य फलम्, तथापि विवेकज्ञानेन अविवेका-वरणनाशाद् नित्यस्यापि तस्य स्वरूपतोऽभिव्यक्तेः विवेकज्ञानसाध्यत्वमुच्यते । प्रागुक्ताभ्यर्हितत्वम् उपादेयत्वं चास्य प्रतिपादयितुमाह,-"परमपुरुषार्थस्ये"ति । परमत्वं-सर्वोत्कृष्टत्वम् । "परिच्छेदः"-विचारगर्भितप्रतिपाद्यैकदेशार्थावधा-रणार्थबोधको ग्रन्थभागः ।

इति श्रीरमेशचन्द्रदेवशर्म्मकृते सांख्यसारविवेकप्रदीपे प्रथमः परिच्छेदः ।

सांख्यसारः ।

पूर्वभागः ।

अथ द्वितीयपरिच्छेदः ।

अथाऽऽत्मानात्मविवेकज्ञानस्य किं स्वरूपं तदुच्यते । (क)

परमपुरुषार्थभूतमुख्यप्रयोजनस्य मोक्षस्य स्वरूपं प्रथमतोऽभिधाय तत्साधनभूतस्य आत्मानात्मविवेकज्ञानस्य स्वरूपमभिधास्यन् पूर्वग्रन्थेन सङ्गतिप्रदर्शनाय अनन्तराभिधानप्रयोजिकां शिष्यजिज्ञासामनुवदति "अथात्मानात्मविवेके"ति । "अथ"—मोक्षस्वरूपनिरूपणानन्तरम्, अस्य च "तदुच्यते" इत्यनेन सम्बन्धः । अनेन पूर्वापरग्रन्थयोरेकवाक्यताप्रतिपत्तिद्वारेण शिष्यप्रवृत्त्युपयोगिनी सङ्गतिः प्रतिपादिता । अन्यथा 'नासङ्गतं प्रयुञ्जीत' इति शास्त्रमनुस्मरतां सङ्गतिराहित्यशङ्कया असम्बद्धवाक्यमेतदिति मन्यमानानां शिष्याणां प्रवृत्तिर्न स्यात् । सङ्गतिश्च अनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयोऽर्थः । यन्निरूपणाव्यवहितोत्तरनिरूपणप्रयोजिका या जिज्ञासा तज्जनकज्ञानविषयीभूतो योधर्म्मः स तन्निरूपितसङ्गतिरित्यर्थः । अत्र तावत् मोक्षस्वरूपाभिधानानन्तरं यत् तत्कारणस्वरूपाभिधानं तत्प्रयोजिका ग्रन्थादौ "आत्मानात्मविवेकसाक्षात्कारा"दित्यादिवाक्येन कारणतयाभिहितस्य विवेकज्ञानस्य कारणत्वं श्रुतवतः शिष्यस्य आत्मानात्मविवेकज्ञानस्य मोक्षरूपेष्टसाधनतया ज्ञानात्—"आत्मानात्मविवेकज्ञानस्य किं स्वरूपमि"ति जिज्ञासा जाता, अतः कार्य्यस्वरूपाभिधानानन्तरं तत्कारणस्वरूपाभिधानप्रयोजिका या जिज्ञासा तस्या जनकं विवेकज्ञानविशेष्यकम् इष्टसाधनताज्ञानम्, तन्निरूपितविशेष्यताख्यविषयताविशेषस्य विवेकज्ञाने सत्त्वेन मोक्षनिरूपणानन्तरं तन्निरूपणे सङ्गतिः । सा च षोढ़ा,-"यथोक्तं,-प्रसङ्ग उपोद्घातो हेतुतावसरस्तथा । निर्वाहैककार्य्यत्वे षोढ़ा सङ्गतिरिष्यते" इति । अत्र च उपोद्घाताख्या सङ्गतिः । तल्लक्षणञ्च,—"चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधा" इति । प्रकृतसिद्ध्यनुकूला अभिहितसिद्धिफलिका चिन्ता उपोद्घात इत्यर्थः । इह मोक्षस्वरूपसिद्ध्यनुकूला विवेकज्ञानविषयिणी चिन्तेत्यलं प्रपञ्चेन । इदानीम् आत्मानात्मे-

आत्मा तावत् सुखदुःखाद्यनुभवितेति सामान्यतो लोकप्रसिद्धिः (ख)

अनात्मा च प्रकृत्यादिर्जडवर्गः, तयोरन्योन्यवैधर्म्म्येण परिणामित्वापरिणामित्वादिरूपेण दोषगुणात्मकेन हेयोपादेयतया पृथक्त्वेन ज्ञानं विवेकज्ञानम् । तथाच श्रुतिः,—स एष नेति नेत्यात्माऽगृह्यो नहि गृह्यतेऽशीर्य्यो नहि शीर्य्यतेऽसङ्गो नहि सज्यतेऽसितो न व्यथते न रिष्यतीत्यादिः ॥

बृ. ४ । ४ । २२ (ग)

त्यादियन्यः व्याख्यायते,—विवेकाख्यान्योन्याभावस्य प्रतियोगिभूतानात्मपदार्थस्य, अनुयोगिभूतात्मपदार्थस्य विवेकज्ञानस्य च, स्वरूपम्=असाधारणरूपं किमिति शिष्यजिज्ञासावाक्यस्योत्तरार्थः । शिष्यप्रश्नस्योत्तरं प्रतिजानीते "तदुच्यते" इति । तत्कारणस्वरूपमुच्यते इत्यर्थः । (क)

आदौ अभ्यर्हितत्वात् सामान्यतोऽनुयोगिपदार्थ उच्यते,—"आत्मे"ति । "तावदि"ति वाक्यालङ्कारे । लोकप्रसिद्ध्यनुसारेण तत्स्वरूपमाह,—"सुखदुःखादी"ति । वस्तुतः आत्मनि सुखदुःखाद्यनुभवाभावाद् उक्तं "लोकप्रसिद्धि"रिति । आत्मनि परमार्थतः तदभावेऽपि प्राकृतान् धर्म्मान् आरोप्य तादृशानुभव इति भावः । विवेकिनां तादृशानुभवस्य बाधितत्वादुक्तम् "सामान्यत" इति । "सामान्यतः"=आपातत इत्यर्थः । "लोकप्रसिद्धिः"=अविवेकेन लोकानां तथा प्रतीतिरित्यर्थः । प्रमाणतः विचारे तु सुखदुःखाद्यनुभवो बुद्धेरेवेति भावः । (ख)

सामान्यरूपेण अनात्मपदार्थ उच्यते "अनात्मा चे"ति । "प्रकृत्यादिः"=आत्मभिन्नानि प्रकृतिमहदहङ्कारादीनि चतुर्विंशतिसंख्यकानि तत्त्वानि । "जडवर्गः"=अचेतनगणः, पुरुषस्यैव चेतनत्वात् तदन्येषां जडरूपता । विवेकप्रयोजकम् अनयोः वैधर्म्म्यं दर्शयति "तयोरन्योन्यवैधर्म्म्येणे"ति । "तयोः"=पुरुषप्रकृत्यादिजडवर्गयोः । "अन्योन्यवैधर्म्म्येण"=परस्परावृत्तिधर्म्मवत्तया । "परिणामित्वादिदोषाः" प्रकृतितत्कार्य्यधर्म्माः पुरुषावृत्तयश्च । ते च स्वाधिकरणप्रकृतेः हेयत्वे कारणम् । अपरिणामित्वादयश्च प्रकृत्याद्यवृत्तयः पुरुषधर्म्मतया उच्यन्ते । ते च स्वाधिकरणपुरुषस्य उपादेयत्वे हेतवः । "आदि"शब्दाभ्याम् त्रिगुणात्रिगुणत्वादीनां संग्रहः । ते च धर्म्माः संगृहीताः कारिकायां श्रीमतेश्वरकृष्णेन,—"त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्म्मि । व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥" इति । विवेकज्ञानशब्दार्थमाह,—"पृथक्त्वेन ज्ञानमि"ति=भेदज्ञान-

स्मृतिश्च,—

> सोऽयं प्रतिनिवृत्ताक्षो गुरुदर्पणबोधितः ।
> स्वतोऽन्यां विक्रियां मोढ्यादास्थितामञ्जसैक्षत ॥ (घ)

मित्यर्थः । अत्र श्रुतिं प्रमाणयति "तथा च श्रुतिरि"ति । स्वरूपतः श्रुतिमुदाहरति "स एष नेत्यादिः" । "नेति नेति" नञः अन्योऽन्याभावः अर्थः । वीप्सया प्रकृत्यादिसकलप्रतियोगिको भेदः उपस्थाप्यते । तथाच प्रकृतिर्न, महान् न, इत्यादिरूपो यो भेदः तदनुयोगी एषः सर्वैरनुभूयमानः आत्मा । "अगृह्यः"—रूपादिहीनतया सकलेन्द्रियागोचरः यतः, अतः "नहि गृह्यते"—नैव इन्द्रियद्वारा उपलभ्यते । "अशीर्य्यः"—शीर्णतायाः अयोग्यः अतः "नहि शीर्य्यते"—नैव विक्रियते । यतः "असङ्गः"—सङ्गरहितः, अतः "नहि सज्यते"—नैव केनचित् संसारधर्म्मेण लिप्यते । यतः "असितः"—छेदनाद्ययोग्यः अतः "न व्यथते"—नहि दुःखादिकम् आप्नोति । "न रिष्यति"—नहि हिंस्यते, स्वरूपाच्च प्रच्यवते इत्यर्थः । एतेन आत्मनि इन्द्रियविषयता, विकारः, सङ्गः, दुःखं, हिंसादयश्च प्राकृतधर्म्माः व्यावर्त्त्यन्ते । (ग)

अत्र स्मृतिं प्रमाणयति,—"स्मृतिश्चे"ति । सा स्वरूपतः उदाह्रियते,—"सोऽये"ति । अथ—गुरूपसर्पणानन्तरम्, "गुरुदर्पणबोधितः"—विशुद्धचित्तेन गुरुणा उपदिष्टः शिष्यः । "प्रतिनिवृत्ताक्षः,"—प्रत्याहृतबाह्यान्तरेन्द्रियः । "मोढ्यात्"—अविवेकात्, "अञ्जसा"—साक्षात्, न तु प्रतिविम्बत्वेनेत्यर्थः । "आत्मनि आस्थितां"—पुरुषधर्म्मत्वेन अभिमन्यमानाम् । "विक्रियां"—प्रकृतिपरिणामभूतां सुखदुःखक्रियाद्याम् । "स्वतः"—स्वभावतः, "अन्याम्"—आत्मव्यतिरिक्तवस्तुनिष्ठां प्रकृत्यादिनिष्ठामित्यर्थः । "ऐक्षत"—विवेकेन साक्षात्कृतवानित्यर्थः । (घ)

"अथ"—विक्रियाजातस्य आत्मव्यतिरिक्तनिष्ठतया साक्षात्करणानन्तरम्" । "असौ"—कृतोपलब्धिः शिष्यः । "इयम्"—विक्रियावत्तया उपलभ्यमाना प्रकृतिः, पदमेतत् महदादीनामपि उपलक्षकम् । "अहं न"—अहम्—पुरुषः, प्रकृतिः न,—ततोऽभिन्न इत्यर्थः । कुतः इत्याह,—"इयं हीति" ·हि=यतः, इयं प्रकृतिः, कलुषात्मिका—परिणामसुखदुःखमोहादिधर्म्मवती । आत्मनः प्रकृतिवैधर्म्म्यमाह,—"अहं शुद्धबुद्धमुक्तस्वभाव"इति । शुद्धः=गुणासङ्गी । बुद्धः=स्वच्छः=ज्ञानरूप इत्यर्थः । "मुक्तः"—अविद्यातत्संस्कारशून्यः । "इति"—इत्येवं

अथासौ प्रकृतिर्नाहमियं हि कलुषात्मिका ।
शुद्धबुद्धस्वभावोऽहमिति त्यजति तां विदन् ॥ (ङ)
एवं देहेन्द्रियादिभ्यः शुद्धत्वेनात्मनि स्मृते ।
निखिला सविकारेयं त्यक्तप्रायाहिचर्म्मवत् ॥ इति

सूत्रं च एवं तत्त्वाभ्यासान् नेति नेति त्यागाद् विवेकसिद्धिरिति । तत्त्वज्ञानस्य लक्षणं च मात्स्ये कृतम्,

अव्यक्ताद्ये विशेषान्ते विकारेऽस्मिंश्च वर्णिते ।
चेतनाचेतनान्यत्वज्ञानेन ज्ञानमुच्यते ॥ इति । (च)

रूपेण,—आत्मानं विशुद्धचिद्रूपतया प्रकृतिं च कलुषात्मकतया । "विदन्"—जानन् । "तां"—कलुषात्मिकां प्रकृतिं । "त्यजति"—तद्धर्म्मान् नात्मनि अध्यस्यन्तीत्यर्थः । (ङ)

एवं पूर्वोक्तरूपेण हेयोपादेयगुणविवेकेन "देहेन्द्रियादिभ्यः"—प्रकृतिपरिणामभूतेभ्यः शरीरेन्द्रियादिभ्यः, "आदि"शब्देन महदादीनां भूतभौतिकानां च संग्रहः । "शुद्धत्वेन"—प्राकृतसुखदुःखकर्त्तृत्वादिधर्म्मशून्यतया विशुद्धचिद्रूपत्वेन, "आत्मनि"—पुरुषे, "स्मृते"—ध्यानेन विज्ञाते । "निखिला"—सकला, "सविकारा"—कार्य्यवर्गसहिता, "इयं"—प्रकृतिः । "अहिचर्म्मवत्—सर्पनिर्म्मोक इव, "त्यक्तप्राया"—पुरुषे तद्धर्म्माणाम् आरोपाभावात् त्यक्तेव भवति । प्रारब्धकर्म्मप्रतिबन्धाद् देहपाताभावेन सामान्यसंयोगवशेन बाधितसंस्कारानुवृत्त्या वा जीवन्मुक्तानां व्यवहारस्य सत्त्वात् "त्यक्तप्रायेत्युक्तम् । सांख्यसूत्रं प्रमाणयति,—तत्त्वाभ्यासादिति"—प्रकृतिपर्य्यन्तेषु जडेषु "नेति ने"त्यभिमानत्यागरूपात् तत्त्वाभ्यासाद् विवेकनिष्पत्तिर्भवतीति सूत्रार्थः । तत्त्वज्ञानलक्षणं दर्शयितुं पुराणवाक्यं स्मारयति "तत्त्वज्ञानस्य लक्षणं चे"ति । तद्वाक्यं स्वरूपतः उदाहरति,—"अव्यक्ताद्ये" इति । तदर्थस्तु,—आदौ भवं—"आद्यम्" मूलकारणम्, अव्यक्तं—प्रधानं, आद्यं—प्रथमं—मूलकारणं यस्य तस्मिन् । "विशेषान्ते—विशेषाः—क्षित्यादीनि महाभूतानि, षोडशसंख्यकानि इन्द्रियाणि च तानि अन्ते यस्य तस्मिन्, "अस्मिन्"—परिलक्ष्यमाणे, "विकारे"—महदादिकार्य्यवर्गे चकारात् प्रधाने, "वर्णिते"—उपदिष्टे सति, "चेतनाचेतनान्यत्वज्ञानेन"—चेतनोऽहम् अचेतनात् प्रकृत्यादेः भिन्न इत्येवंरूपेण ज्ञानेन अवधारणेन यज् "ज्ञानं"—पुरुषस्वरूपपरिच्छेदः, तदेव "उच्यत"—मोक्षसाधनतयोच्यते इत्यर्थः । (च)

यद्यप्यन्योन्यभेदज्ञानमेव विवेकज्ञानं तथाप्यात्मविशेष्यकमेव तन्मोक्षकारणं भवति । (क)

आत्मा वाऽरे द्रष्टव्य [बृ २ । ३ । ४ ।] इत्यादिश्रुतिस्मृतिभ्यः । (ख)

आत्मानात्मभेदज्ञानरूपं विवेकज्ञानं मोक्षकारणं भवतीत्युक्तं प्राक् । तच्च भेदज्ञानं प्रतियोग्यनुयोगिज्ञानसापेक्षम् ; "प्रकृत्यादेर्भिन्न आत्मे"तिज्ञाने विशेष्यापराभिधः अनुयोगिपदार्थः आत्मा, प्रतियोगिपदार्थश्च अनात्मगणः उक्तः । आत्मानुयोगिकप्रकृत्यादिगणप्रतियोगिकभेदप्रकारकज्ञानमिति तदर्थः । एवम् "आत्मनः भिन्नः प्रकृत्यादिगणः" इत्येवंज्ञानविषये भेदे आत्मा प्रतियोगी, प्रकृत्यादिगणश्च विशेष्यापराभिधानुयोगिपदार्थः । तदर्थश्च प्रकृत्यादिगणानुयोगिकात्मप्रतियोगिकभेदप्रकारकज्ञानम् । इत्युभयथापि आत्मानात्मभेदज्ञानसम्भवाद् , अनयोः प्रकारयोः कीदृशं भेदज्ञानं मोक्षजनकमिति शङ्कते,–"यद्यपी"ति । "यद्यपि"=विवेकज्ञानस्य उभयरूपतासम्भवे सत्यपि । विवेकज्ञानस्य उभयरूपतां दर्शयति "अन्योन्यभेदज्ञानमेवे"ति । परस्परानुयोगिकभेदप्रकारकज्ञानमेव विवेकज्ञानमित्यर्थः । तच्च प्राक् प्रदर्शितमेव । विनिगमनाविरहेण उभयविधविवेकज्ञानस्यैव मोक्षजनकत्वं युक्तमिति शङ्कार्थः । शङ्काया उत्तरमाह,–तथापीति, तथापि=विवेकज्ञानस्य उभयरूपत्वसम्भवेऽपि । आत्मविशेष्यकविवेकज्ञानस्यैव मोक्षजनकत्वमवधारयति "आत्मविशेष्यकमेवे"ति । आत्मविशेष्यकम् =आत्मानुयोगिकप्रकृत्यादिप्रतियोगिको भेदः, तत्प्रकारकम्, "एव"-कारेण प्रकृत्याद्यनुयोगि विवेकज्ञानं व्यावृत्यते । "तत्"=ज्ञानम्, मोक्षकारणं= मुक्तिसाधनमित्यर्थः । (क)

अस्यां विनिगमनायां श्रुतिं प्रमाणयति "आत्मा वा अरे" इति । अत्र "वै" शब्दः अवधारणे, "अरे"शब्दः मैत्रेय्याः सम्बोधने, अरे मैत्रेयि आत्मा एव द्रष्टव्यः=विवेकेन साक्षात् कर्त्तव्यः मोक्षाय इत्यर्थः । अत्र श्रुतौ आत्मन एव विशेष्यतया उक्तेः आत्मविशेष्यकविवेकज्ञानमेव मोक्षजनकम् , नतु प्रकृत्यादिविशेष्यकम् । तथात्वे प्रकृत्यादिर्द्रष्टव्य इत्येवंरूपःश्रुतिनिर्द्देशः स्यात् । आदिशब्देन "सहोवाचैतद्वक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाशमसङ्गमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखममात्रमनन्तरमबाह्यं न तदश्नाति किंचन न तदश्नाति कश्चन ॥ [वृ, ७ । ८ । ८] इत्यादिश्रुतिर्गृह्यते । तदर्थस्तु,–स्थूलं यच्छरीरादि

नन्वनात्मन्यात्मबुद्धिरूपा याऽविद्या पातञ्जलादिषूक्ता तस्याः कथमात्मविशेष्यकविवेकज्ञाननाश्यत्वम् प्रकारादिभेदादिति चेन्न । (झ)

तद्भिन्नं ब्रह्मेत्यर्थः । एवम् अग्रे यत् मनःप्रभृति तद्भिन्नं ब्रह्मेत्यादि । स्थूलशरीरादिभिन्नब्रह्मस्वरूपात्मज्ञानमेव मोक्षजनकमित्यर्थः । तथाच आत्मविशेष्यकभेदज्ञानादेव कैवल्यमिति सिद्धम् । "नान्यं गुणेभ्यः कर्त्तारं यदा द्रष्टानुपश्यति । गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥" [गीता १४।१९] इत्यादयः स्मृतयश्च प्रमाणतया ग्राह्याः, इत्येतन्मनसि निधाय आह,— "स्मृतिभ्य" इति । (ञ)

पातञ्जलदर्शने "अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्ये"ति सूत्रे अनात्मनि विशेष्ये आत्मज्ञानम् अर्थात् तादात्म्यसम्बन्धेन आत्मप्रकारकानात्मविशेष्यकं ज्ञानमविद्येत्युक्तम्, तस्य च निवर्त्तकम् अनात्मनि आत्मभेदज्ञानम् अर्थाद् अनात्मविशेष्यकमात्मभेदप्रकारकज्ञानमेव,न तु ग्राह्याभावानवगाहि आत्मविशेष्यकम् अनात्मभेदप्रकारकम् आत्मा प्रकृत्यादिगणाद् भिन्नः इत्येवंरूपं ज्ञानम् । तादात्म्यसम्बन्धेन रजतप्रकारकस्य इदंपदार्थशुक्तिविशेष्यकस्य इदं रजतमिति ज्ञानस्य इदंपदार्थशुक्तिविशेष्यकेण रजतभेदप्रकारकेण इदं रजतभिन्नमितिज्ञानेन बाधदर्शनेन एकस्मिन् विशेष्ये समानप्रकारकयोरेव भावाभावज्ञानयोः विरोधित्वनियमस्य क्लृप्तत्वात् । नच प्रकारताविशेष्यताभेदे भावाभावयोर्विरोधः सम्भवति, नहि आत्मा चेतन इति आत्मविशेष्यकं चेतनाभेदप्रकारकं ज्ञानम् घटोऽचेतन इति घटविशेष्यकेण चेतनभेदप्रकारकेण ज्ञानेन विरुध्यते ; नवा आत्मा गौर इति आत्मविशेष्यकं गौराभेदप्रकारकं ज्ञानम्, आत्मा अजड इति आत्मविशेष्यकेण जडभेदप्रकारकेण ज्ञानेन विरुध्यते । तत् कथम् आत्मा प्रकृत्यादिगणाद् भिन्न इति आत्मविशेष्यकज्ञानेन अनात्मनि प्रकृत्यादिगणे विशेष्ये आत्मबुद्धिरूपा अविद्या बाधनीयेति शङ्कते "नन्वनात्मे"ति । "अनात्मनि" इत्यनेन अनात्मनः प्रकृत्यादेर्गणस्य अनुयोगित्वानर्थान्तरं विशेष्यत्वमुक्तम् । "आत्मबुद्धिरूपे"त्यनेन अविद्यायाम् आत्माऽभेदः, अभेदसम्बन्धेन आत्मा वा प्रकारः उक्तः । "आत्मविशेष्यक"इत्यनेन बाधकत्वाभावे हेतुः विशेष्यताभेदः प्रतिपादितः । नहि प्रकृत्यादिविशेष्यकस्यात्माभेदप्रकारकस्य अभेदसम्बन्धेन आत्मप्रकारकस्य वा ज्ञानस्य आत्मविशेष्यकेण प्रकृत्याद्यभेदप्रकारकेण ज्ञानेन बाधसम्भवः, इति भावः । "नाश्य-

तादृशाऽविद्याया अनात्मविशेष्यकविवेकज्ञानद्वारेणाऽऽत्मविशेष्यकविवेकज्ञाननाश्यत्वादिति । (ञ)

त्वम्"=बाध्यत्वम् । अस्य च "कथ"मित्यनेनान्वयः । "कथमि"त्याक्षेपे, कथमात्मविशेष्यकविवेकज्ञाननाश्यत्वम्? तन्न भवतीत्यर्थः । निरुक्ताज्ञानस्य तादृशज्ञाननाश्यत्वाभावे हेतुं दर्शयति,—"प्रकारादिभेदादि"ति । "आदि"शब्दाद् विशेष्यताभेदः उक्तः । उक्तज्ञानयोः बाध्यतयाभिमतज्ञाने प्रकृत्यादेः विशेष्यता, बाधकत्वाभिमतज्ञाने आत्मनो विशेष्यता ; एवं बाध्यत्वाभिमतज्ञाने अभेदसम्बन्धेन आत्मा प्रकारः, बाधकत्वाभिमतज्ञाने प्रकृत्यादिभेदः प्रकारः । अतः प्रकारताविशेष्यताभेदाज्ज्ञानयोः बाध्यबाधकत्वं सम्भवतीत्यर्थः । (झ)

अत्र सिद्धान्तमभिधास्यन् पूर्वपक्षं निषेधति "चेन्ने"ति । नैष दोष इत्यर्थः । सिद्धान्त उच्यते,—"तादृशाविद्याया" इति=प्रकृत्यादिगणः आत्मा इत्येवंरूपाया अविवेकज्ञानस्येत्यर्थः । आत्मविशेष्यकानात्मभेदप्रकारकज्ञानस्य परम्परया बाधकत्वमङ्गीकरिष्यन् साक्षाद् बाधकं ज्ञानं दर्शयति,—"अनात्मविशेष्यकविवेकज्ञानद्वारेणे"ति = अवान्तरव्यापारभूतेन अनात्मप्रकृत्यादिविशेष्यकेण आत्मभेदप्रकारकेण प्रकृत्यादिगणः आत्मनः भिन्न इत्येवंरूपेण विवेकज्ञानेनेत्यर्थः । अस्य ज्ञानस्य व्यापाररूपत्वाद् न आत्मविशेष्यकज्ञानस्य करणताहानिः, व्यापारवत्कारणस्यैव करणत्वाङ्गीकारात्, नहि व्यापारेण व्यापारिणोऽन्यथासिद्धिः, ज्वालयेव काष्ठस्य । परम्परया बाधकज्ञानस्य स्वरूपमाह,—"आत्मविशेष्यकविवेकज्ञाननाश्यत्वादि"ति । आत्मविशेष्यकं विवेकज्ञानम् =आत्मा प्रकृत्यादिगणाद् भिन्नः इत्येवंरूपं भेदज्ञानम् । तेन "नाश्यत्वात्"=बाध्यत्वात् । "नाश्यत्वादि"त्यस्य पूर्वोक्तेन "तादृशाविद्यायाः" इत्यनेनान्वयः । अनेन एतदुक्तं भवति,—तत्रादौ तावत् अनादिवासनावशतः प्रकृत्यादौ अनात्मनि आत्मज्ञानरूपा अविद्या स्वभावसिद्धा सर्वप्राणिनां भवति, ततश्च प्राक्तनसुकृतवशात् कस्यचिद् "आत्मा वा अरे द्रष्टव्य"इत्यादिश्रुतिवाक्यश्रवणाद् आत्मसाक्षात्कारेच्छा जायते, ततस्तत्साधनाकाङ्क्षायां "श्रोतव्योमन्तव्योनिदिध्यासितव्य"इति श्रुतिवाक्यतः श्रवणादीनां साधनत्वविज्ञानात् तदनुष्ठानात् प्रकृत्यादेर्विवेकेन अहं प्रकृते भिन्नः इत्येवंरूपो विवेकेन आत्मसाक्षात्कारो जायते, तत्र च विवेके प्रकृत्यादिगणः प्रतियोगी, आत्मा च अनुयोगी, तादृशज्ञानानन्तरं तुल्यवित्तिवेद्यतया आत्मनः भिन्नः प्रकृत्यादिगणः इत्येवंरूपं प्रकृत्यादिगणविशेष्यकम् आत्मप्रतियोगिकं भेदप्रकारकं ज्ञानं जायते । ततश्च

यच्च योगेन निर्विकल्पकमात्मज्ञानं जायते तद् विवेकज्ञानद्वारैव मोक्षकारणं भवति नतु साक्षाद् अविद्यानिवर्त्तकत्वाभावात् ॥ (८)

प्रथमज्ञानेन तृतीयज्ञानस्य एकस्मिन्नेवानात्मनि विशेष्ये आत्माभेदात्मभेदप्रकारयो विरोधाद् मिथ्याज्ञानवासनामूलस्य प्रथमस्य प्रमाणासिद्धेन तृतीयेन बाधः । नास्त्यतः कश्चिदनुपपत्तिलेशोऽपीति दिक् । (ञ)

नन्वेवम् आत्मविशेष्यकानात्मभेदप्रकारकस्य अहं प्रकृत्यादिगणाद् भिन्नः इत्येवंरूपस्य विवेकज्ञानस्य व्यापारभूतेन अनात्मविशेष्यकात्मभेदप्रकारकेण प्रकृत्यादिगण आत्मनः भिन्नः इत्येवंरूपेण विज्ञानेन अनात्मविशेष्यकात्माभेदप्रकारकज्ञानरूपाया अविद्याया निवर्त्तकत्वे योगजन्यस्य निर्विकल्पकात्मसाक्षात्कारस्य कथं श्रुतिस्मृतिप्रसिद्धम् अविद्यानिवर्त्तकत्वं घटते? निर्विकल्पकज्ञानस्य प्रकारताविशेष्यताशून्यत्वाद्, इत्याशङ्क्याह,—"यच्च योगेने"ति । "यच्चे"त्यनेन सुप्रसिद्धत्वमस्यार्थस्योक्तम् ।

"योगेन"—अस्मितानुगतसम्प्रज्ञातयोगेन । "निर्विकल्पकम् आत्मज्ञानम्"—प्रकारतादिशून्यं पुरुषज्ञानम् । आत्मनः निर्धर्मकत्वात् तज्ज्ञानं निर्विकल्पकमेव । पुरुषज्ञानस्य सविकल्पकत्वाभावश्च उक्तः योगवार्त्तिके भिक्षुपादैन अस्मितारूपानुगतसम्प्रज्ञातस्य द्वैविध्यनिरासप्रसङ्गेन,—"केवलपुरुषज्ञानस्य निर्विकल्पकमात्ररूपतया द्विविधत्वासम्भवादि"ति । अतः निर्विकल्पकपुरुषज्ञानस्य अविद्या निवर्त्तकत्वं न शक्यसम्भावनमिति शङ्कार्थः ।

शङ्कायाः समाधानमाह,—"तद्विवेकज्ञानद्वारैवे"ति—निर्विकल्पकज्ञानानन्तरजातसविकल्पकविवेकज्ञानद्वारेण अविद्यानिवर्त्तकत्वमित्यर्थः । तथाच आदौ निर्विकल्पकात्मकः आत्मसाक्षात्कारः जायते, ततः सविकल्पिका विवेकख्यातिरुपजायते, तया च अविद्या निवर्त्तते । इत्थं च निर्विकल्पकात्मसाक्षात्कारस्य परम्परया मोक्षे उपयोगः । निर्विकल्पकात्मसाक्षात्कारस्य परम्परया मोक्षसाधनत्वं द्रढ़यितुं साक्षात्साधकत्वं निषेधति "नतु साक्षादि"ति—विवेकज्ञानमनुत्पाद्य न मोक्षजनकमित्यर्थः । कथं न साक्षात् मोक्षजनकमित्यतः आह, "अविद्यानिवर्त्तकत्वाभावादि"ति । नित्यविशुद्धचित्स्वभावे आत्मनि न परमार्थतः बन्धःसम्भवति, तदभावाच्च न तत्प्रतियोगिनः मोक्षस्य सम्भवः । अतः अविवेकेनैव कर्त्तृत्वभोक्तृत्वादिरहिते आत्मनि कर्त्तृत्वभोक्तृत्वादिरूपोबन्धः एष्टव्यः । श्रुतिस्मृत्यादि-

अहं गौरः कर्ता सुखी दुःखीत्यादिज्ञानमेव ह्यविद्या, संसारानर्थहेतुतया श्रुतिस्मृतिन्यायसिद्धा, तस्याश्च निवर्तिका नाऽहं गौरः इत्यादिरूपा विवेकख्यातिरेव भवति । (ठ)

ष्वपि तथैव उक्तः । ततश्च अविद्यायामनिवर्त्तितायाम् मोक्षस्यासम्भवान्निर्विकल्पकज्ञानस्य अविद्यानिवर्त्तकत्वाभावेन न साक्षान्मोक्षजनकत्वमित्यर्थः । (ट)

अविद्यास्वरूपप्रदर्शनपूर्वकं निर्विकल्पकात्मज्ञानस्याविद्यानिवर्त्तकत्वाभावं प्रपञ्चयति "अहं गौर"इति । गौरादेः तादात्म्येन देहत्वसामानाधिकरण्यदर्शनाद् आत्मनिदेहाभेदारोपः उक्तः । अनेन च श्रुतिस्मृत्युक्तः अन्नमयकोषः संगृहीतः, तथाच श्रुतिः-"स वा एषः पुरुषोऽन्नरसमयः" इत्यादिः । "कर्ता"इत्यनेन, स्पन्दनादिक्रियाकर्तृत्वस्य साधारणेन्द्रियवृत्तिरूपेषु प्राणादिषु दर्शनाद् इन्द्रियाद्यभेदः आत्मनः सूचितः । तेन श्रुत्याद्युक्तप्राणमयकोषः क्रोडीकृतः । तथाच श्रुतिः-"तस्माद्वा एतस्मादन्योऽन्तरात्मा प्राणमय"इति । "सुखी दुःखी" इत्यनेन मनोमयविज्ञानमयकोषौ उक्तौ । तथाच श्रुतिः,-"अन्योऽन्तरात्मा मनोमयः" "अन्योऽन्तरात्मा, विज्ञानमय"इति । एभिरानन्दमयकोषोऽपि उपलक्षितः । अविद्याशरीराणां कोषपञ्चकानां बन्धकारणत्वं श्रुत्यादिप्रसिद्धम्, कोषकृमिबन्धककोषसारूप्येण कोषशब्दनिर्वचनसिद्धं च । "त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि" "तरति शोकमात्मविदि"ति "श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदि"ति "सोऽहं भगवः शोचामि तं मा भगवाञ्छोकस्य पारं तारयतु" इत्यादयः श्रुतयः, "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" "अहङ्कारविमूढात्मा कर्ताहमिति मन्यते" इत्यादिकाः स्मृतयश्च प्रकृत्यादौ आत्मानुयोगिकभेदाभावज्ञानस्य अविद्यात्वे, तस्याः अविद्यायाः संसारानर्थहेतुत्वे च प्रमाणम् ।

स्रग्भुजङ्गादि दृष्टान्तसिद्धः,-देहादौ आत्मानुयोगिकभेदाभावज्ञानरूपा अविद्या अनर्थहेतुः अविद्यात्वात्, स्रजि भुजङ्गाद्यभेदज्ञानरूपाऽविद्यावदित्यादिरूपः न्यायश्च । यथाहि भुजङ्गाद्भिन्नाऽपि स्रक् भुजङ्गाभिन्नतया विज्ञाता भयकम्पमरणादेर्जनिका तथा आत्मनोभिन्नोऽपि प्रकृत्यादिगणः तदभिन्नतया ज्ञातः कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वादिरूपं संसारानर्थजातं जनयतीति तदर्थः । एतदभिप्रेत्य उक्तम्,-"श्रुतिस्मृतिन्यायसिद्धे"ति ।

समाने विषये ग्राह्याभावत्वप्रकारकग्राह्याभावज्ञानत्वेनैव विरोधात् । (ड)

"अहं गौर" इत्यादिरूपाया अविद्याया निवर्त्तकं ज्ञानमाह,—"नाहं गौर" इति । 'अहं गौर' इति वाक्यात् गौरविशिष्टदेहाभिन्न आत्मेति प्रतीयते सैवाविद्या ।=तस्या निवर्त्तिका च "नाहं गौरः" इति वाक्यजन्या "गौरविशिष्टदेहभिन्न आत्मा" इति प्रतीतिः, ईदृशभेदविज्ञानमेव विवेकख्यातिरित्युच्यते, इत्यतः आह,—"विवेकख्यातिरि"ति । तदुक्तं योगभाष्ये महर्षिणा व्यासदेवेन,—'सत्त्वपुरुषान्यताप्रत्ययो विवेकख्यातिरि'ति । (ढ)

सविकल्पकज्ञानात्मकविवेकख्यातेरेव अविद्यानिवर्त्तकत्वे हेतुत्वं प्रपञ्चयति,—"समाने विषये"इति । समाने=तुल्ये । विषये=अधिकरणे विशेष्ये इति यावत्, एकस्मिन्नेव विशेष्ये इत्यर्थः । यथा इदं रजतमित्यादौ प्रसिद्धोदाहरणे इदन्त्वावच्छिन्ने शुक्तिरूपे विशेष्ये । प्रकृते च आत्मनि । "ग्राह्याभावत्वप्रकारकग्राह्याभावज्ञानत्वेने"ति । "ग्राह्यस्य"=भ्रमज्ञानविषयतामापन्नस्य, शुक्तिरजतादौ रजतस्य, प्रकृते गौरदेहस्य । अत्र ग्राह्यतावच्छेदकसम्बन्धेनेति वक्तव्यम् । तथाच, ग्राह्यतावच्छेदकसम्बन्धेन,=उदाहरणे प्रकृते च उभयत्र तादात्म्यसम्बन्धेन, योऽभावः=उदाहरणे रजतान्योन्याभावः, प्रकृते गौरदेहान्योन्याभावः, तस्य भावः=धर्म्मः=ग्राह्याभावत्वम्, उदाहरणे रजताभावत्वम्, प्रकृते गौरदेहाभावत्वम्, तदेव प्रकारो यस्मिन् रजताभावे, प्रकृते गौरदेहाभावे । तादृशो यो ग्राह्याभावः=तादात्म्यसम्बन्धावच्छिन्नं उदाहरणे रजताभावत्वप्रकारकः, प्रकृते गौरदेहाभावत्वप्रकारको योऽभावः,=उदाहरणे रजतभेदरूपः प्रकृते गौरदेहभेदरूपः । तज्ज्ञानत्वेन=उदाहरणे रजतभेदप्रकारकज्ञानत्वेन, प्रकृते च गौरदेहभेदप्रकारकज्ञानत्वेन । "एव"कारेण निर्विकल्पकज्ञानादि व्यावर्त्यते । निर्विकल्पकज्ञानं न विरोधीत्यर्थः । "विरोधात्"=प्रतिबन्धकत्वात् । संयोगादिसम्बन्धेन रजताभावत्वप्रकारकरजताभावज्ञानस्य तादात्म्यसम्बन्धेन रजताभेदप्रकारकज्ञानविरोधापत्तेरुक्तं ग्राह्यतावच्छेदकसम्बन्धेनेति । प्रमेयत्वेन रजताभावावगाहितया इदं प्रमेयमिति ज्ञानस्यापि रजताभेदज्ञानविरोधित्वापत्तेरुक्तम् ग्राह्याभावत्वप्रकारकेति । तथाच इदमत्रफलितम्,—इदन्त्वावच्छिन्नशुक्तिनिष्ठविशेष्यताकं तादात्म्यसम्बन्धेन * रजतभेदप्रकारकम् यज्ज्ञानम् तदेव इदन्त्वावच्छिन्नविशेष्ये शुक्तौ रजताभेदज्ञानवि-

* तादात्म्यसम्बन्धेनेति तृतीयार्थो भेदप्रतियोगितान्वय्यवच्छिन्नत्वमिति, एवमुत्तरत्रापि । प्रकारतावच्छेदकसम्बन्धस्तु स्वरूप एव ।

अन्यथा शुक्तिनिर्विकल्पकस्यापि इदं रजतमिति ज्ञानविरोधित्वापत्तेः । (ठ)

किञ्च यथोक्ताभावज्ञाने ग्राह्यज्ञानविरोधित्वस्यावश्यकतया निर्विकल्पकज्ञानस्य भ्रमनिवर्त्तकत्वं न पृथक् कल्प्यते गौरवाद् । (क)

रोधि । एवम् आत्मनिष्ठविशेष्यताकं तादात्म्यसम्बन्धेन गौरदेहभेदप्रकारकं यज्ज्ञानं तदेव आत्मनि विशेष्ये गौरदेहाभेदप्रकारकज्ञानविरोधि, न निर्विकल्पकात्मज्ञानमिति सिद्धम् निर्विकल्पकात्मज्ञानस्य विवेकज्ञानद्वारेणैव मोक्षसाधकत्वमिति । (ड)

एतदनङ्गीकारे दोषमाह,–'अन्यथे''ति=उक्तरूपं बाध्यबाधकभावमनङ्गीकृत्य निर्विकल्पकज्ञानस्यापि अविद्यानिवर्त्तकत्वस्वीकारे । ''शुक्तिनिर्विकल्पकस्य''–आदौ शुक्तौ इन्द्रियसन्निकर्षमात्राज्जातस्य विशेष्यताप्रकारताशून्यज्ञानस्य । "इदं रजतमिति''–इदंविशेष्यकरजताभेदप्रकारकज्ञानस्य इत्यर्थः । "विरोधित्वापत्तेः'' बाधकत्वापत्तेः । अनेनैतदुक्तम्,–शुक्तौ इन्द्रियसन्निकर्षाद् इदं यत्किञ्चिद्वस्तु इत्येवं रूपं सम्मुग्धं यत् निर्विकल्पकं ज्ञानं जायते, तस्य यथा न शुक्तौ रजतज्ञानविरोधित्वं तथा आत्मनिर्विकल्पकज्ञानस्यापि न आत्मनि अनात्मतादात्म्यज्ञाननिवर्त्तकत्वमिति । (ठ)

ननु यथाऽद्वैतवादे "यद्विशिष्टबुद्धिर्हि यत्र विरोधिनी तद्विशिष्टबुद्धिपूर्वक एव तदुपलक्षितधर्म्मिमात्रविषयकनिर्विकल्पकनिश्चयः तद्विरोधी, तथाच द्वैताऽभावविशिष्टबुद्धिप्रतिबध्यो द्वैतभ्रमः तादृशबुद्धिपूर्वकतादृशब्रह्मनिश्चयप्रतिबध्यः" इत्येवंरूपेण निर्विकल्पकब्रह्मज्ञानस्य अविद्यानिवर्त्तकत्वमङ्गीक्रियते कैश्चित्, एवं सांख्यमतेऽपि निर्विकल्पकात्मज्ञानस्य अविद्यानिवर्त्तकत्वं स्वीकर्त्तुं शक्यते, तथा हि प्रकृत्यादिभेदविशिष्टबुद्धिर्हि प्रकृत्याद्यभेदरूपाया अविद्याया विरोधिनी, अतस्तदुपलक्षित आत्मविषयकनिर्विकल्पकरूपनिश्चयः प्रकृत्याद्यभेदविरोधीति । शुक्तिनिर्विकल्पकज्ञानस्य तु तादृशविशिष्टबुद्धिपूर्वकत्वाभावात् प्रमात्मकनिश्चयरूपत्वाभावाच्च न रजताभेदज्ञानविरोधित्वम् । अपि च मिथ्याज्ञाननिमित्तकः संसार इति सर्वेषां तीर्थकाराणां सम्मतम्, तस्य च निवर्त्तकः आत्मसाक्षात्कारः इति च सर्वानुमतम्, "आत्मा वा अरे द्रष्टव्य" इत्यादिश्रुतिस्मृतिषु तथैवोपदेशात्, न्यायसिद्धत्वाच्च । तादृशात्मसाक्षात्कारश्च निर्विकल्पकरूप एव सम्भवतीत्युक्तमधस्तात् । तत्कथमस्य निर्विकल्पकात्मसाक्षात्कारस्य नाविद्यानिवर्त्तकत्वमङ्गी-

अपि चाऽथात आदेशो नेति नेति नह्येतस्मादिति नेत्यन्यत् परमस्ती [बृ २।३।६] त्यादिश्रुत्या विवेकोपदेशापेक्षयोत्तमोपदेशो नास्तीत्युच्यते । (ख)

कर्त्तुं शक्यते ? इति पूर्वोक्तनियमेऽश्रद्दधतः श्रद्धोत्पादनाय तत्पक्षे गौरवदोषमादर्शयन् अनुपपत्तिमाह किञ्चेति ।

"यथोक्ताभावज्ञाने"—आत्मनि गौरदेहभेदज्ञाने। "बाह्यज्ञानविरोधित्वस्य"—गौरदेहाभेदज्ञानविरोधस्य । "आवश्यकतया"—समानप्रकारयोः भावाभावज्ञानयोः प्रतिबध्यप्रतिबन्धकत्वस्य सर्वत्र दृष्टत्वेन अवश्यकल्पनीयतया । "निर्विकल्पकज्ञानस्य"—केवलात्मस्वरूपज्ञानस्य । "भ्रमनिवर्त्तकत्वम्"—मिथ्याज्ञानविरोधित्वम् । "न पृथक् कल्प्यते"—न कारणतया स्वीक्रियते । गौरवात्"—अननुगतानेककारणकल्पने गुरुत्वदोषापातात् । दृष्टं निरुक्तकार्य्यकारणभावं परित्यज्य निर्विकल्पकज्ञानस्यापि अज्ञाननाशकारणताकल्पने कुत्रचित् बाह्याभावज्ञानं मिथ्याज्ञाननाशकारणम्, क्वचित् निर्विकल्पकं ज्ञानं कारणमिति गौरवं स्यात्, अतस्तन्नैव कल्प्यते इति भावः । (क)

श्रुत्याद्यस्वरसदर्शनेन पूर्वोक्तगौरवस्य प्रमाणसिद्धत्वेनादोषत्वं मत्वा अपरितुष्यतः आत्मनि अनात्मभेदप्रकारकविवेकज्ञानस्यैव श्रुत्यादिप्रसिद्धमुख्यकारणत्वं प्रतिपादयितुमाह,—"अपि चे"ति । "अथात आदेशो नेति नेती"त्यादिश्रुतौ प्रकृत्यादिपदार्थाद् विविक्तात्मज्ञानस्यैव मोक्षं प्रति प्रकृष्टसाधनत्वाभिधानात् तदेकवाक्यतया "आत्मा वा अरे द्रष्टव्य" इत्यादावपि विविक्तरूपात्मसाक्षात्कार एव मोक्षसाधनतया श्रुत्यभिप्रेतः मन्तव्यः, न निर्विकल्पकज्ञानमिति भावः । श्रुतेरस्या अयमर्थः । "अथ"—सत्याख्यब्रह्मनिर्द्देशादनन्तरं । "अतः"—यतः सत्यस्य सत्यम् अनिरूपितरूपमस्ति अस्माद् हेतोः । "आदेशः"—आत्मस्वरूपनिर्द्देशः । "नेति नेति"—इतिशब्दद्वयेन पूर्वोक्तमूर्त्तामूर्त्तरूपं अन्तरिक्षवायुतेजःपृथिव्यादिकं पदार्थजातमनूद्य वीप्सार्थे द्विरुक्तनञा उक्तनिखिलपदार्थप्रतियोगिकभेदः आत्मनि विधीयते, तथाचायमर्थो भवति,—आत्मा=अन्तरिक्षं नेत्यादि, एवं प्रकृत्याद्यमूर्त्तपदार्थभेदोऽपि बोद्धव्यः । "नहि"—नैव । "एतस्मादिति नेति"—नेतीत्येतस्मादादेशात्,—उक्तसकलभेदरूपादादेशात्—आत्मस्वरूपनिर्द्देशादित्यर्थः । "परमस्ति"—प्रकृष्टमस्ति, नैव प्रकृष्टमस्तीत्यर्थः । "उत्तमोपदेशः"—प्रकृष्टसाधनतया उपदेश इत्यर्थः । (ख)

क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा ।
भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम् ॥

इति गीतादिवाक्येश्च विवेकज्ञानस्यैव मोक्षहेतुत्वमुच्यते । अतो विवेकज्ञानमेव साक्षादविद्यानिवृत्त्या मोक्षहेतुः । (ग)

योगेन केवलात्मसाक्षात्कारस्तु योग्यानुपलब्धिविधयोपाध्यादिगत-

तादृशविवेकज्ञानस्य प्रकृष्टमोक्षसाधनत्वे गीतावाक्यमुदाहरति,—"क्षेत्रक्षेत्रज्ञयोरि"ति । "क्षेत्रं"=शरीरम्, एतत् तदुपादानभूततन्मात्राहङ्कारबुद्धिप्रकृतीनामुपलक्षणम् । "क्षेत्रज्ञः"=आत्मा । "अन्तरं"=तयोर्भेदः । "ज्ञानचक्षुषा"=विवेकज्ञानलक्षणेन चक्षुषा । तथा या "भूतानां प्रकृतिः" तस्याः सकाशात् "मोक्षं"=मोक्षोपायं ध्यानादिकं च ये "विदुः"=जानन्ति, ते "परं"=आत्मस्वरूपेणावस्थानलक्षणमोक्षरूपं पदम् । "यान्ति"=प्राप्नुवन्ति । "विवेकज्ञानस्यैव"=प्रकृत्यादिभ्यः आत्मभेदज्ञानस्यैव । एवकारेण निर्विकल्पकात्मसाक्षात्कारस्य व्यावृत्तिः, न तु निर्विकल्पकात्मसाक्षात्कारस्येत्यर्थः । प्रकृतमुपसंहरति "अत" इति "अतः"=निर्विकल्पकात्मज्ञानस्य अविद्यानिवर्त्तकत्वाभावादित्यर्थः । आत्मनिर्विकल्पकज्ञानस्यापि परम्परया अविद्यानिवर्त्तकत्वादुक्तं "साक्षादि"ति । "साक्षात्"=व्यापारान्तरमनन्तर्भाव्य । एतेनात्मनिर्विकल्पकज्ञानस्य सविकल्पकज्ञानद्वारा अविद्यानाशकत्वेऽपि मोक्षं प्रति अन्यथासिद्धत्वमिति सूचितम् । "अविद्यानिवृत्त्या"=अविवेकनाशेन । "मोक्षहेतुः"=मुक्तिसाधनम् । विवेकज्ञानं कमपि व्यापारमनपेक्ष्यैव अविवेकं निवर्त्तयति, तेन च अविद्यानाशद्वारेण विवेकज्ञानं मुक्तिसाधनमिति भावः । (ग)

विवेकज्ञानस्यैव अविद्यानिवृत्त्या मोक्षजनकत्वे निर्विकल्पकात्मसाक्षात्कारस्य वैफल्यमाशङ्क्य तत्परिहरन् आत्मनिर्विकल्पकज्ञानस्य परम्परया अविद्यानिवृत्तिसाधनत्वम् दर्शयति "योगेने" ति । "केवलात्मसाक्षात्कारः"=निर्विकल्पकात्मसाक्षात्कारः । "योग्यानुपलब्धिविधया"=अभावप्रत्यक्षजनकयोग्यानुपलब्धिरूपकारणमुखेन । अत्रेदमवधेयम्—अभावप्रत्यक्षे योग्यानुपलब्धेर्हेतुता सर्वैरेव वादिभिरङ्गीक्रियते । भाट्टवेदान्तिभिस्तु तस्याः पृथक्प्रमाणतेति विशेषः । योग्येऽधिकरणे प्रतियोगिनोऽनुपलब्धिः, योग्यस्य प्रतियोगिनः अधिकरणेऽनुपलब्धिश्च योग्यानुपलब्धिरिति केचित् । तन्मते षष्ठीसमासपक्षे स्तम्भे पिशाचादिभेदस्य प्रत्-

धर्म्माभावमुपाध्यादिभेदं च ग्राहयति, ततोऽविद्यानिवृत्तिरिति । (घ)

स्यक्षत्वापत्तिः दोषः । सप्तमीसमासपक्षे तु आत्मनि धर्म्माधर्म्माद्यभावस्यापि प्रत्यक्षत्वापत्तिः दोषः, उभयत्र अनुगतयोग्यताया अभावात् । अतः योग्या चासौ अनुपलब्धिश्चेति कर्म्मधारयः आश्रयितव्यः । तदाश्रयणे तु नोक्तदोषावतारः । तदर्थस्तु,—"योग्यानुपलब्धिः"=दर्शनयोग्यस्य अनुपलब्धिः=अदर्शनं=दर्शनाभाव इति यावत् । यत्र "अत्र यदि स्यात् तदा दृश्येत" इत्येवंरूपस्य आपादनस्य सम्भवः तत्रैव दर्शनयोग्यस्य दर्शनाभावः, नतु सर्वत्र । अतएव स्फीतालोकवति भूतले यदि घटः स्यात् तदा घटवत्तया उपलम्भः स्यादित्यापादनसम्भवात् तादृशभूतले घटाभावः अनुपलब्धिगम्यः । अन्धकारे तु तादृशापादनासम्भवात् नानुपलब्धिगम्यता । स्तम्भे तादात्म्येन पिशाचसत्त्वे स्तम्भवत् प्रत्यक्षत्वापत्त्या तदभावोऽनुपलब्धिगम्यः । आत्मनि धर्म्मादेः सत्त्वेऽपि अस्यातीन्द्रियतया निरुक्तोपालम्भापादनासम्भवाद् न धर्म्माद्यभावस्य अनुपलब्धिगम्यत्वम् । अतएव योग्यप्रतियोगिकत्वयोग्याधिकरणत्वादिरूपा योग्यता तत्तदभावग्रहे नानैव । योग्यतानुगमस्तु तर्कितप्रतियोगिसत्त्वप्रसञ्जनयोग्यप्रतियोगिकत्वरूपः । अस्यार्थस्तु यस्याभावो गृह्यते तस्य यः प्रतियोगी, तस्य सत्त्वेन अधिकरणे तर्कितेन प्रसञ्जनयोग्यं आपादनयोग्यं यत् प्रतियोगि उपलब्धिस्वरूपं यस्यानुपलम्भस्य तत्त्वं तदनुपलब्धियोग्यत्वम् ॥ तथा च आत्मनि उपाधिधर्म्माणां प्राकृतसुखदुःखकर्त्तृत्वादीनाम् अभावः, उपाधिरूपप्रकृत्यादेर्भेदश्च निश्चीयते । तथाहि,—यद्यस्मिन् सुखादिकं स्यात् तदा अस्मितानुगतसम्प्रज्ञातयोगजन्यनिर्विकल्पकात्मसाक्षात्कारकालेऽयं सुखादिमत्तया उपलभ्येत, यतः तदा अन्यस्मात् विविक्तोऽयमात्मा तथा नोपलभ्यते अतः नात्मनि सुखादिकमस्ति । आत्मा यदि देहाद्यभिन्नः स्यात् तदा अस्मितानुगतसम्प्रज्ञातसमाधिजन्यनिर्विकल्पकात्मसाक्षात्कारकाले देहाद्यभिन्नतया उपलभ्येत, यतो न तादृशसमाधिकाले तथाभूतत्वेनोपलभ्यते, अतो नात्मा देहाद्यभिन्नः । इत्यादिरूपयोग्यानुपलब्धिज्ञानसम्पादनद्वारा निर्विकल्पकात्मसाक्षात्कारः आत्मनि उपाधिधर्म्माभावज्ञानम् उपाध्यादिभेदज्ञानं च जनयित्वा अविद्यां निवर्त्तयति । अतः अस्ति निर्विकल्पकात्मज्ञानस्य परम्परया अविद्यानिवर्त्तकत्वं, ततश्च तद्मोक्षोपकारकमिति । (घ)

एतेन सर्वभूतेषु समताज्ञानमात्मनः सर्वात्मकत्वादिज्ञानञ्च श्रुति-स्मृत्युद्गीयमानं विवेकज्ञानस्यैव शेषभूतं सर्वदर्शनेषु मन्तव्यम्। (ङ)

ननु "यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥"
"नित्यः सर्वगतो ह्यात्मा कूटस्थो दोषवर्जितः।
एकः स भिद्यते शक्त्या मायया न स्वभावतः॥"
"एक एव हि भूतात्मा भूते भूते व्यवस्थितः।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत्॥"
"ब्रह्मैवेदं सर्वम् आत्मैवेदं सर्वम्"

"यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति, एवं मुने विजानतः आत्मा भवति गौतम।" "निरञ्जनः परमं साम्यमुपैति।" इत्याद्याः श्रुतयः,—तथा,—

सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि।
समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति॥
ज्योतिरात्मनि नान्यत्र सर्वभूतेषु तत्समम्।
स्वयञ्च शक्यते द्रष्टुं सुसमाहितचेतसा॥
यावानात्मनि वेदात्मा तावानात्मा परात्मनि।
य एवं सततं वेद सोऽनन्त्योऽपि न मुह्यति॥

इत्याद्याः स्मृतयश्च आत्मनः सर्वात्मकताज्ञानं सर्वभूतेषु तुल्यताज्ञानञ्च मोक्षहेतुतया प्रतिपादयन्ति, तत्कथं विवेकज्ञानस्य मोक्षहेतुत्वमुपपद्यते? इत्यत आह,—"एतेन सर्वभूतेष्वि"ति। "एतेन"=विवेकख्यातेरेव मोक्षकारणता-कथनेन। विवेकज्ञानमेव मोक्षे प्रधानं कारणं, सर्वात्माभेदज्ञानं सर्वात्मसमता-ज्ञानं च देहादौ आत्माभिमाननिवृत्तिद्वारा विवेकज्ञानोत्पत्तौ कारणम्। तथाहि,—आब्रह्मस्तम्बपर्य्यन्तेषु आत्मनः विरुद्धधर्म्मशून्यतया एकरूपत्वे प्रतिपा-दिते तदुपपत्त्यर्थं शिष्यः स्वयमेव तावद् विचारयति, यावन्निर्विशेषे स्वरूपे पर्य्यवस्यतीति। ततश्च निर्विशेषे आत्मस्वरूपे निश्चिते अभिमानरागद्वेषा-दयः आत्मनः स्वयमेव निवर्त्तन्ते।

ननु आत्मैकत्वप्रतिपादकानां वाक्यानाम् वेदान्तैकदेशिसम्मतम् अखण्ड-रूपैकत्वमेव अर्थः भवतु, ततश्च वैधर्म्याभावस्यापि बोधात् ततः अभिमानादयः

ज्ञानान्तराणां साक्षादभिमानानिवर्त्तकत्वात् । ब्रह्ममीमांसायां त्वयं

निवर्त्तिष्यन्ते । अत्रोच्यते, एकस्यैव वाक्यस्य उभयार्थता, वैधर्म्याभावबोधकता च न सम्भवति, वाक्यभेदप्रसङ्गात्, तादृशज्ञाने फलाभावात्, न्यायानुगृहीत-बलवतीभिः भेदग्राहकश्रुतिस्मृतिभिर्विरोधाच्च । अतः वैधर्म्याभावबोधने एव एतेषां वाक्यानां तात्पर्य्यम् । एकत्वपर्य्यवसन्नसर्वभूतसमत्वविज्ञानं तु तदङ्गम् । तथाचोक्तं प्रवचनभाष्येऽनेनैव ग्रन्थकृता,—

एकोऽद्वितीय इति वेदवचांसि पुंसि सर्वाभिमानविनिवर्त्तनतोऽस्य मुक्त्यै ।
वैधर्म्यलक्षणभिदाविरहं वदन्ति नाखण्डतां ख इव धर्म्मशताऽऽविरोधात् ॥इति ।

"शेषभूतम्"—अङ्गत्वप्राप्तम्, विवेकज्ञानम् अङ्गि, सर्वात्मकतादिज्ञानं च तत्साधकतया तदङ्गम् इति फलितार्थः । सकलशास्त्रार्थविरोधादेतदन्याय्य-मित्याशङ्क्यास्मिन् सिद्धान्ते सर्वदर्शनानां सम्मतिमाह "सर्वदर्शनेषु मन्तव्य-मि"ति "सर्वदर्शनेषु"—न केवलं वेदान्तदर्शनेऽपितु न्यायादिसकलदर्शनेष्वपि । "मन्तव्यमि"ति—तत्र तत्र कण्ठतः विवेकज्ञानस्य अविद्यानिवर्त्तकत्वानुक्तावपि युक्त्या तदेव निश्चेतव्यमिति भावः । (६)

ननु दर्शनान्तरेषु न्यायवेदान्तादिषु ज्ञानान्तराणि देहात्मभेदात्मैक्यादि-गोचराणि मिथ्याज्ञाननाशद्वारेण मोक्षसाधनानीत्युक्तानि, तत्कथं तथा सर्ववि-दितं सिद्धान्तं परित्यज्य तेषां विवेकज्ञानाङ्गत्वं वक्तुं शक्यते ? इत्याशङ्क्य तेषा-मपि स्वतः अभिमाननिवर्त्तकत्वायोगात् आत्मनि प्रकृत्यादिधर्म्माणां रागद्वेषसुख-दुःखकर्त्तृत्वादीनाम् अभिमानरूपाया अविद्याया निवर्त्तने सामर्थ्याभावेन विवे-कज्ञानोत्पादनद्वारैव मोक्षकारणतेति कथयन् स्वोक्तं द्रढयति "ज्ञानान्तराणा-मि"ति । "ज्ञानान्तराणां"—देहात्मभेदात्मैक्यादिज्ञानानाम् "साक्षादभिमाना-निवर्त्तकत्वात्"—विवेकज्ञानमनुत्पाद्य आत्मनि आरोपितानां बुद्ध्यादिधर्म्माणाम् अनाशकत्वात् ।

ननु जीवब्रह्मैक्यादिज्ञानानां मोक्षसाधनत्वे ब्रह्ममीमांसासिद्धान्तविरोधः स्यादित्यत आह,—"ब्रह्ममीमांसायामि"ति । अस्यायमभिप्रायः । ब्रह्ममीमांसा-यामपि विवेकज्ञानस्यैव प्राधान्येन मोक्षहेतुत्वम्, प्रागुक्तश्रुत्यादिभ्यः, "भेदव्यपदे-शाच्चान्यः" "अधिकन्तु भेदनिर्द्देशादि"त्यादिवेदान्तसूत्रेभ्यश्च सिद्धम्, "तत्त्व-मसि" "सोऽहमि"त्यादिवाक्यजन्यजीवब्रह्माभेदज्ञानन्तु बुद्ध्यादियुक्ते जीवे आत्माभिमाननिवृत्तिद्वारा विवेकज्ञानस्यैव अङ्गम् ।

विशेषो यत् परमात्मविवेकशेषत्वम्। सांख्यशास्त्रे तु सामान्यात्मविवेकशेषत्वमिति दिक्। (च)

सांख्यशास्त्राद् ब्रह्ममीमांसायाः अयमेव विशेषः, यत्, सांख्ये, विरुद्धधर्म्माभावेन सकलजीवाभेदज्ञानस्य, प्राणादियुक्तचैतन्यरूपजीवस्य तत्त्वमस्यादिवाक्येन साक्षिचैतन्याभेदज्ञानस्य, च आत्मनि अभिमाननिवृत्तिद्वारा सामान्यतः आत्मविवेकाङ्गत्वम्, ब्रह्ममीमांसायान्तु ब्रह्माख्यपरमात्मविवेकाङ्गत्वम्। तदेतदुक्तम् ब्रह्ममीमांसाभाष्ये श्रीमता भिक्षुपादेन,—"यस्मिन् विकारजातं सर्व्वं वाचारम्भणमात्रं, समुद्रे तरङ्गबुद्बुदादिवत् क्षणभङ्गुरं, मायेन्द्रजालादिसदृशं, यस्य सूर्य्यकिरणादिवत् सर्व्वे जीवाः अंशाः, यदधीनसत्तास्फुर्त्तिकत्वात्तु प्रकृतितद्गुणजीवादयोऽपि स्वाप्नवस्तुवद् दृश्यत्वेन स्वतः सिद्धत्वाभावेन च न परमार्थसन्तः, यश्च स्वतो मायातद्गुणजीवादिभ्यः जीवाविलक्षणचिन्मात्रोऽतएव च यः पञ्चविंशतितत्त्वानाम् आत्मजीवकार्य्यकारणसंघातस्य तन्तुरिव च पटस्य, यदपेक्षया च भोक्तात्मा जीवः प्राणादिवज्जडतया अनात्मैव तमेव परात्मानं परं ब्रह्म विविच्य निखिलवेदान्तमहावाक्यार्थभूतं शमदमादिसाधनसम्पन्नः विद्वान् "स मे आत्मेति" "सोऽहं"मिति मायाजीवादिविवेकेन आत्मतया साक्षात्कृत्य अविद्याकामधर्म्माधर्म्मादिक्षये निखिलदुःखादिभिरहितैवात्यन्तं विमुच्यते, "न तस्य प्राणा उत्क्रामन्ती"ति श्रुतेः—इति।

ननु जीवब्रह्माभेदज्ञानं जीवादिभ्यः परमात्मविवेकज्ञानस्य कथमङ्गम् अन्योन्यविरोधात्? नहि घटपटभेदज्ञानस्य तयोरभेदज्ञानमङ्गं भवितुमर्हतीति चेदुच्यते,—यथा सांख्यमते अन्तःकरणाद् भिन्नोऽपि जीवः तस्यात्मतया तस्याहमिति प्रमाविषयोभवति, तथैव जीवादिदेहान्तेभ्यः भिन्नमपि ब्रह्म जीवादीनामात्मतयाऽन्तःकरणस्याहमिति प्रमाविषयः स्यात्, अन्तर्य्यामितया प्रलये जीवादिलयाधारतया च ब्रह्मैव सर्वेषां परमार्थिकात्मेत्यर्थस्य सिद्धत्वात्। यथाच जीवात्मताज्ञानाद् देहाद्यभिमानरूपाऽविद्यानिवृत्तिर्भवति, तथैव ब्रह्मात्मताज्ञानात् जीवादिष्वप्यभिमानस्य निवृत्तिः स्यात्। देहाद्यभिमानश्च संसारहेतुः अतः संसारहेतुभूतदेहाद्यभिमाननिवर्त्तकतया अहं ब्रह्मास्मीत्यादिज्ञानं मोक्षजनकं प्रति उपकरोति विवेकज्ञानस्य, तस्मात् जीवब्रह्मैक्यज्ञानं विवेकज्ञानस्याङ्गमिति उच्यते।

ननु यथोक्तविवेकख्यातितोऽप्यत्यन्तमविद्योच्छेदो न घटते विवेकख्यातेरविद्याप्रतिबन्धकत्वमात्रत्वेन विवेकख्यातिनाशोत्तरं पुनरभिमानसम्भवात् । शुक्तिरजतविवेकदर्शिनोऽपि कालान्तरे शुक्तौ रजतभ्रमवदिति । मैवम् । दृष्टान्तवैषम्यात् । (छ)

न्यायवैशेषिकादिदर्शनसम्मतं देहेन्द्रियेभ्यः आत्मभेदज्ञानञ्च क्रमेण बुद्ध्यादिविवेकज्ञानोत्पादनद्वारा उपकरोति सांख्योक्तविवेकज्ञानस्येत्यलं प्रपञ्चेन । (च)

विवेकज्ञानेन अविद्यानाशद्वारा त्रिविधदुःखात्यन्तनिवृत्तिलक्षणो मोक्षः साध्यते इत्युक्तम् । तच्च न युज्यते, विवेकज्ञानं हि विरोधितया स्वसत्ताकाले अविद्यां प्रतिबध्नातीति तत् प्रतिबन्धकमुच्यते, अस्य च तृतीयक्षणध्वंसप्रतियोगितया स्वनाशोत्तरं पुनरपि अविद्योत्पत्तिसम्भवात् पुनः संसारप्रसङ्गो दुर्वार इति शङ्कते "नन्वि"ति । "यथोक्तविवेकख्यातितः"=आत्मा प्रकृत्यादेर्भिन्नः इत्येवंरूपात् विवेकज्ञानात् । विवेकज्ञानेन स्वसमानकालीनयत्किञ्चिदविद्योच्छेदे सत्यपि भविष्यदविद्योच्छेदानुपपत्तिप्रदर्शनाय "अत्यन्ते"ति उच्छेदक्रियाविशेषणमुपात्तम् । कालान्तरेऽपि स्वसमानाधिकरणाविद्याया अनुत्पत्तिस्तस्या अत्यन्तमुच्छेदः । "न घटते"=नोपपद्यते । अविद्याया अत्यन्तोच्छेदाभावे हेतुमाह,—"विवेकख्यातेरि"ति । "प्रतिबन्धकमात्रत्वेन"=केवलविरोधितया । मात्रशब्देन अत्यन्तध्वंसहेतुता व्यावृत्यते । "विवेकख्यातिनाशोत्तरम्"=चतुर्थक्षणादौ, प्रतिबन्धकापनये । यथार्थज्ञानेन बाधोत्तरं मिथ्याज्ञानस्य पुनरप्युत्पत्तौ दृष्टान्तमाह,—शुक्तिरजते"ति । यथा आदौ शुक्तौ रजतभ्रमवतः पश्चात् शुक्तिगतविशेषधर्म्मदर्शनात् शुक्तिज्ञानेन रजतज्ञानस्य नाशात्परं पुनरपि दोषवशात् तत्र शुक्तौ रजतभ्रमो जायते तद्वदित्यर्थः । उक्तां शङ्कां निषेधति "मैवमि"ति=नैवं शङ्का युज्यत इत्यर्थः । शङ्काया अनुकूलं दृष्टान्तं भनक्ति,-"दृष्टान्तवैषम्यादि"ति । "वैषम्यात्"=दृष्टान्तदार्ष्टान्तिकयोरतुल्यत्वात् । अत्र दोषसत्त्वासत्त्वे वैषम्यम् । शुक्तिरजतादौ दृष्टान्ते दोषस्य नयनगततिमिरादेः अल्पान्धकारदूरत्वादेश्च समूलम् अविनाशात् पुनरपि भ्रमः सम्भवति, अत्रतु विवेकज्ञानेन दोषस्य समूलं विनाशात् पुनरनुत्पत्तिरविद्याया इत्यर्थः । (छ)

शुक्त्यादिषु जातेऽपि साक्षात्कारे दूरत्वादिरूपविषयदोषाणां पाटलादिरूपकरणदोषाणां चोत्पत्तिसम्भवेन पुनर्भ्रमः युक्तः अनात्मन्यात्मा-

---

दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यं प्रदर्शयितुं दृष्टान्ते शुक्तिरूप्यादौ दोषं निरूपयन् तस्मिं कस्य नाशेऽपि पुनर्दोषान्तरस्योत्पत्तिसम्भावनया तत्कार्य्यभ्रमस्यापि पुनरुत्पत्तिम् उपपादयति "शुक्त्यादिष्वि"ति । "साक्षात्कारे"=रजतभ्रमबाधके अधिष्ठानशुक्तिस्वरूपप्रत्यक्षे । शुक्त्यादिविषयगतं, तथा चक्षुरादीन्द्रियगतं द्विविधं दोषं दर्शयति "दूरत्वे"ति । 'पाटलादिः"=चक्षुरादिगतः रोगविशेषः । दार्ष्टान्तिके अनात्मनि आत्माभिमाने पूर्वोक्तविलक्षणं मिथ्याज्ञानजन्यसंस्काररूपं दोषं निरूपयति "अनात्मनी"ति । "अनात्मनि"=आत्मभिन्ने, प्रकृतिबुद्ध्यादौ अचेतनवर्गे इत्यर्थः । "तु" शब्दः=पूर्ववैलक्षण्यद्योतकः । "अनादिवासना"=पूर्वपूर्वजन्मजन्यमिथ्याज्ञानजन्यः संस्कारः । वासनाया अनादिता च प्रवाहरूपेण बोध्या । साच कार्य्यानादिता उच्यते । तदुक्तं "तदाकृत्युपरक्तानां व्यक्तीनामेकया विना । अनादिकालस्यावृत्तिर्या सा कार्य्यानादिता मता ॥" इति । एतेन अनादिभावभूताया वासनायाः कथं ज्ञाननाश्यतेत्याशंकाऽपि निरस्ता वेदितव्या । वासनायाः दोषत्वे सकलदार्शनिकानां सम्मतिं दर्शयन् स्वकल्पितत्वापादनेनाप्रामाण्याशङ्कां निरस्यति "सर्वास्तिकसम्मत" इति । "आस्तिक"शब्देन परलोकमनङ्गीकुर्वतां चार्वाकादीनां व्युदासः । ते हि देहस्यैव चैतन्यम् अङ्गीकृत्य तस्य स्वाभाविकीं प्रवृत्तिमङ्गीकुर्वन्ति । एतन्मतस्यान्याय्यत्वं च स्फुटमाकरे । तत्र अनादिवासनाया एव दोषत्वे हेतुप्रदर्शनपूर्वकमुपपत्तिमाह,—"जातमात्रस्ये"ति । "जातमात्रस्य"=तद्दिनजातस्य,=जन्मोत्तरं स्तन्यपानादिव्यवहारे इहभवीयप्रत्यक्षादिजन्यसंस्कारादिरूपकारणाभाववतः इत्यर्थः ।

अयमत्राशयः—मातृगर्भाज्जातमात्र एव शिशुः अनात्मनि आत्माभिमानसम्पन्न एव स्तन्यपानरोदनादौ प्रवर्त्तते, अनात्मनि बुद्धीन्द्रियदेहादौ अचेतने आत्मत्वारोपाभावे बुद्ध्यादेरचेतनत्वात् आत्मनश्च असङ्गतया कर्त्तृत्वाद्यभावाद्, इष्टसाधनताज्ञानादिविरहाच्च स्तन्यपानादौ प्रवृत्तिरसम्भव एव स्यात् । नहि बुद्ध्यादौ चैतन्यस्य चेतने च कर्त्तृत्वादेरारोपाभावे स्तन्यपानादौ इष्टसाधनताज्ञानं तज्जन्या प्रवृत्तिर्वा सम्भवति, अतोऽन्योन्यारोपपूर्वकं प्राग्भवीयस्तन्यपानादेरिष्टसाधनत्वमनुस्मृत्य तद्दृष्टान्तेन तज्जातीयत्वात् इहभवीयस्तन्य-

भिमाने त्वनादिवासनैव दोषः सर्वास्तिकसम्मतः, जातमात्रस्याभिमाने दोषान्तरानुपलब्धेः । (ज)

सा मिथ्याज्ञानवासना यदा विवेकख्यातिपरम्पराजन्यदृढवासनो-

पानादेरपि इष्टसाधनतामनुमाय प्रवर्त्तते इत्यानुपूर्व्या सिद्धम् । रजतार्थी पुरुषो हि आदौ शुक्तिकायां पाटवदूरत्वादिदोषवशात् तद्गतविशेषमगृहीत्वा रजतसादृश्यात् पूर्वानुभूतरजतं तत्संस्कारद्वारेण आरोप्य तत्र पूर्वदृष्टरजत-साजात्येन इष्टसाधनतामनुमाय तद्ग्रहणाय प्रवर्त्तते । अतः शुक्तिकादौ रजता-द्यारोपे सर्वत्र पूर्वदृष्टरजतानुभवजन्यसंस्कारादेः तद्ग्रहणाद्यर्थे प्रवृत्तौ इष्ट-साधनतानुमानस्य च कारणतायाः सिद्धत्वात् अत्रापि तथैव संस्कारादेः कारणता कल्पनीया । केवलमनयोरागन्तुकदोषसत्त्वासत्त्वरूपविशेषः बोद्धव्यः । न च तत्र रजतादिप्रमाजन्यसंस्कारस्य कारणत्वदर्शनात् सर्वत्र आरोपे तस्यैव कारणतेति वाच्यम्, यथार्थानुभवजन्यसंस्कारस्य कारणताकल्पनापेक्षया अनुभवजन्यसंस्कारस्य कारणताकल्पने लाघवात्, अदृष्टरजतस्य कदाचिद् रङ्गादौ रजतभ्रमवतः पुरुषस्य मिथ्यारजतज्ञानजन्यसंस्कारवशात् शुक्तिकादौ पुनारजतभ्रमदर्शनाच्च भ्रममात्रे, भ्रमप्रमासाधारणानुभवजन्यसंस्कारस्यैव हेतुतायाः कल्पनीयत्वात् । अतः सिद्धं जातमात्रबालकस्य प्राथमिकारोपे इहभवीयानुभवजन्यसंस्काराद्यभावात् पूर्वपूर्वभवीयमिथ्याज्ञानजन्या वासनैव हेतुरिति । पूर्वपूर्वजन्माभ्यस्तवासना अस्मिन् जन्मनि अनात्मादौ आत्मत्वारोपे हेतुः तत्रत्यवासनाया अपि तत्पूर्वभवीयमिथ्याज्ञानं कारणम्, तत्रापि तत्पूर्व-भवीयवासना हेतुरित्येवंरूपेण सर्वत्र पूर्वपूर्वजन्मजन्यवासनायाः कारणता अव-गन्तव्या । संसारस्यानादितायाः प्रमाणसिद्धत्वेन नेतरेतराश्रयानवस्थादिदूषणं बीजाङ्कुरवदिति संक्षेपः । वासनातिरिक्तः कश्चिद्दोषः तत्रास्तु इत्यत आह,— "दोषान्तरे"ति । "अनुपलब्धेः"—उपलम्भाभावात् । यदि वासनातिरिक्तदोषः स्यात् प्रमाणात उपलभ्येत, इत्येवं अभावग्राहकानुपलब्धेः दोषान्तराणामभावो-निश्चीयते इतिभावः । (ज)

ननु भवतु पूर्वभवीयवासनारूपदोषजन्या अविद्या, तथापि वासना-नामानन्त्यात् बहुजन्माभ्यस्ततया सुदृढत्वात् अभिनववासनोत्पत्तौ धर्माधर्मात्मककर्महेतुरस्य अनुभवात्मकस्य च कारणस्य सद्भावाच्च तत्क्षणमात्रजातेनादृढेन एकेनैव विवेकज्ञानेन कथं तासां नाशः इत्याशङ्क्य

न्मूलिता तदैव विवेकसाक्षात्कारनिष्ठोच्यते ।

तत्पूर्वमवश्यं वासनालेशतो मिथ्याज्ञानांशस्य कस्याप्यात्मनि भावात् तस्याञ्च विवेकख्यातिनिष्ठायां जातायां न पुनरभिमानः सम्भवति वासनाख्यदोषाभावादिति तु महद् वैषम्यम् । (भा)

यदि तु बुद्धिपुरुषयोरन्योन्यप्रतिबिम्बनादिकमविवेककारणं दोष

तद्बाधनक्षमसुदृढविवेकख्यातिस्वरूपप्रदर्शनपूर्वकं तन्निष्ठां दर्शयति "से"ति अस्यायमर्थः,–न केवलेन विवेकज्ञानेन सर्वासां वासनानां समुच्छेदः, अपितु विवेकख्यातिपरम्पराजन्येन संस्कारसमूहेन तासां विनाशः । यतः तत्त्वपक्षपातो हि धियां स्वभावः, तत्त्वनिष्ठा हि बुद्धिः स्थिरतामाप्नोति, अतो न सुदृढैरपि भ्रमजनकदोषैः चाल्यते । तदुक्तं बाह्यैरपि,–"निरुपद्रवभूतार्थस्वभावस्य विपर्ययैः । न बाधोऽयत्नवत्त्वेऽपि बुद्धेस्तत्पक्षपाततः ॥" इति । विवेकख्यातिनिष्ठायाश्च दृढत्वे हेतुरुक्तः योगशास्त्रे–"स तु दीर्घकालादरनैरन्तर्य्यसत्कारासेवितदृढभूमिरि"ति । विवेकख्यातिजन्याभिश्च सुदृढवासनाभिः अनेकजन्मसहस्रजाता अपि मिथ्याज्ञानवासनाः समूलघातं निहन्यन्ते । ततः न पुनस्तत्यानमविद्याया इति ।

ननु विवेकख्यातिवासनया चेत् मिथ्याज्ञानवासना समूलमुपहन्यते तदा विवेकख्यातिमतः जीवन्मुक्तस्य कथं देहाद्यभिमानः तन्मूलव्यवहारश्च दृश्यते ? इत्यतः तत्र विवेकख्यातिनिष्ठाया अभावेन बाधिताविवेकस्य सत्त्वं तन्निष्ठायान्तु तदसत्त्वमिति वैषम्यं दर्शयति "तत्पूर्वमि"ति । "तत्पूर्वं"–विवेकख्यात्युत्पत्तेः परतः तत् निष्ठायाः पूर्वं । "वासनालेशतः"–बाधितमिथ्याज्ञानवासनालवतः । "मिथ्यांशस्य"–जीवन्मुक्तव्यवहारप्रयोजकबाधितमिथ्याज्ञानस्य । "कस्याप्यात्मनि"–जातविवेकख्यातेः कस्यचित् आत्मनि । "भावात्"–अभिमानकारणमिथ्याज्ञानसंस्कारस्य सत्त्वात्, अयं वैषम्ये एको हेतुः । "वासनाख्यदोषाभावात्"–विवेकख्यातिनिष्ठया प्राक्तनसकलसंस्काराणां क्षयितत्वादित्यर्थः । अयञ्च वैषम्येऽपरः हेतुः । "महद्वैषम्यं"–प्रथमोत्पन्नविवेकख्यातितः तन्निष्ठाया महान् भेदः । (भा)

ननु अविवेकस्य न मिथ्याज्ञानजन्यवासना एव दोषः, अपितु बुद्धिपुरुषयोरन्योन्यप्रतिबिम्बोऽपि अविवेकख्यातेर्मूलमास्थेयम् । तथाहि,–चेतनोऽहं जानामीत्यादि वृत्तिचैतन्ययोः सामानाधिकरण्यदर्शनात् प्राकृतत्वेन जडायां बुद्धि-

लभ्यते तदा तु तद्दोषं बाधित्वैव विवेकसाक्षात्कार उदितः इति न तस्य पुनर्भ्रमहेतुत्वं फलबलेन योगजधर्म्मासहकृतस्यैव तस्य दोषत्वकल्पनासम्भवादिति । (ञ)

वृत्तौ चैतन्यसमर्पणार्थं तत्र पुरुषस्य प्रतिबिम्बः अवश्यमङ्गीकार्य्यः, इत्ययं सांख्यसिद्धान्तः सर्व्वैरादिसम्मतः, अस्मिन् भिक्षुनये तु ईदृशार्थाकाराया बुद्धेरपि पुरुषे प्रतिबिम्बः अङ्गीक्रियते, तदुक्तमनेन सांख्यप्रवचनभाष्ये,—"इन्द्रियप्रणालिकया अर्थसन्निकर्षेण लिङ्गज्ञानादिना वादौ बुद्धेरर्थाकारा वृत्तिर्जायते" तत्र चेन्द्रियसन्निकर्षजा प्रत्यक्षा वृत्तिरिन्द्रियविशिष्टबुद्ध्याश्रिता, नयनादिगतपित्तादिदोषैः पित्ताद्याकारवृत्त्युदयादिति विशेषः । सा च वृत्तिरर्थोपरक्ता प्रतिबिम्बरूपेण पुरुषारूढा सती भासते, पुरुषस्यापरिणामितया बुद्धिवत् स्वतोऽर्थाकारत्वासम्भवात् । अर्थाकारताया एव च अर्थग्रहणत्वात्, अन्यस्य दुर्वचत्वादिति । तदेतत् वक्ष्यति जपास्फटिकयोरिव नोपरागः किन्त्वभिमान इति, योगसूत्रं च "वृत्तिसारूप्यमितरत्रे"ति । स्मृतिरपि 'तस्मिंश्चिद्दर्पणे स्फारे समस्ता वस्तुदृष्टयः । इमास्ताः प्रतिबिम्बन्ति सरसीव तटद्रुमाः ॥" इति । योगभाष्यं च "बुद्धेः प्रतिसंवेदी पुरुष"इति । प्रतिध्वनिवत् प्रतिसंवेदः संवेदनप्रतिबिम्बस्तस्याश्रय इत्यर्थः" इति ननु अन्योन्यप्रतिबिम्बस्याविवेकहेतुत्वं कथं शक्यसम्भावनम् ? अविवेकं विना अन्योन्यप्रतिबिम्बनस्यैवासम्भवादितरेतराश्रयदोषापत्तेरिति वाच्यम्, अनयोरनादित्वेन पूर्वाविवेकः परस्मिन् अन्योन्यप्रतिबिम्बने हेतुः, तादृशप्रतिबिम्बनञ्च पुनरविवेके कारणम् इति ध्येयम् । तथात्वे च तादृशप्रतिबिम्बनरूपदोषस्य सत्त्वात् विवेकख्यात्युत्तरं कथं न पुनरपि अविद्याया अवतारः इत्याशंकते "यदि तु" इति । "यदि" शब्दः=सम्भावनायाम्, "तु" शब्दः=भेदद्योतकः, यदि कारणान्तरं सम्भ्रियते इत्यर्थद्योतकं निपातद्वयम् । "बुद्धिपुरुषयोरन्योन्यप्रतिबिम्बादिकम्"—बुद्धेः चैतन्यसम्पादनार्थं तत्र पुरुषस्य प्रतिबिम्बः पुरुषे च अर्थभानार्थं स्वात्मप्रकाशार्थं च अर्थाकारायाः बुद्धेः प्रतिबिम्बनं, इत्यादिकम्, आदिशब्देन बुद्धिपुरुषयोः अनादिसंयोगादयः उच्यन्ते । "दोषः"—अविवेकख्यातिरूपः भ्रमकारणीभूतः दोषः । उक्तशङ्कां परिहरति "तदा तु" इति । "तदा तु"—परस्परप्रतिबिम्बादेः अविवेकख्यातौ दोषत्वाङ्गीकारपक्षे तु । "तद्दोषं बाधित्वैव"=परस्परप्रतिबिम्बरूपदोषं निरस्यैव । "विवेकसाक्षात्कारः"=प्रत्यक्षात्मकप्रकृतिपुरुषयोः भेदज्ञानम् । "उदितः"=उत्पन्नः । "इति" शब्दः=हेतौ । "तस्य"—

विवेकख्यातिनिष्ठा च गीतादिषु लक्षिता,–

प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव।
न द्वेष्टि सम्प्रवृत्तानि न निवृत्तानि काङ्क्षति॥
उदासीनवदासीनो गुणैर्यो न विचाल्यते।
सर्वारम्भपरित्यागी गुणातीतः स उच्यते॥ [गीतां १४-२२]

अन्योन्यप्रतिबिम्बरूपदोषस्य। "न पुनर्भ्रमहेतुत्वं"=न अविवेकख्यातिरूपभ्रमस्य पुनरुत्पत्तौ कारणत्वम्। विवेकसाक्षात्कारेण निवृत्तस्य भ्रमस्य न पुनरुत्पाद इत्यर्थः। अत्र हेतुमाह "फलबलेने"ति। "फलबलेन"=कार्य्यदर्शनेन। "योगजधर्म्मासहकृतस्य"=समाधिजन्यसंस्काररहितस्य। "एव" कारेण तादृशसंस्कारयुक्तस्य व्यावृत्तिः। "तस्य"=अन्योन्यप्रतिबिम्बादेः। "दोषत्वकल्पनासम्भवात्"=अविवेकोत्पादकदोषरूपकारणतानुमानसम्भवात्। अस्यायमाशयः, अन्वयव्यतिरेकदर्शनेन कार्य्यस्य अन्यथा अनुत्पादं निश्चित्य तत्कारणं कल्प्यते इति हि कार्य्यदर्शनतः कारणकल्पने नियमः। यथा मृदमन्तरेण घटस्यानुत्पत्तिदर्शनेन सामग्रीसहकृतमृत्सत्त्वे च तदुत्पत्तिदर्शनात् मृत्कारणकत्वं घटस्य कल्प्यते, एवं योगजधर्म्मासहकृतान्योन्यप्रतिबिम्बसत्त्वे अविवेकदर्शनात् तत्सहकृतान्योन्यप्रतिबिम्बसत्त्वे जीवन्मुक्तादौ अविवेकादर्शनात् तादृशान्योन्यप्रतिबिम्बाभावे अविवेकरूपकार्य्यस्यानुपपत्त्या योगजधर्म्मरहितान्योन्यप्रतिबिम्बस्यैव दोषाख्यकारणता कल्प्यते इति। (ज)

प्रागुक्तविवेकख्यातिनिष्ठास्वरूपं गीतावाक्यैः प्रमाणयितुमाह–"विवेकख्यातिनिष्ठा चे"ति। गीतावाक्यान्युदाहरति "प्रकाशं चे"ति। अत्र "विचाल्यते" इत्यादि सार्द्धश्लोकात् परं पूर्वापरयोरर्द्धेन युक्तः एकः श्लोकः द्रष्टव्यः यथा,–

गुणा वर्त्तन्ते इत्येवं योऽवतिष्ठति नेङ्गते।
समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः॥
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः।
मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः।

एषां श्लोकानां व्याख्या उदाह्रियते,–स्थितप्रज्ञस्य काभाषेत्यादिना द्वितीयाध्याये पृष्टमेव, दत्तोत्तरमपि तत् पुनर्विशेषबुभुत्सया पृच्छतीति ज्ञात्वा प्रकारान्तरेण तस्य (विवेकख्यातिनिष्ठाप्राप्तस्य स्थितप्रज्ञस्य) लक्षणादिकं

गुणातीतो निवृत्तगुणाभिमानः । अधिकन्तु ज्ञानिलक्षणमग्रे वक्ष्यामः । नन्वेवमपि विवेकप्रतियोगिपदार्थानामानन्त्येन प्रातिस्विकरूपैः सर्वपदार्थेभ्यो

श्रीभगवान् उवाच प्रकाशञ्चेत्यादिभिः । तच्चैकेन लक्षणमाह-प्रकाशमिति, प्रकाशञ्च सर्वद्वारेषु देहेऽस्मिन्निति पूर्वोक्तं सत्त्वकार्य्यं, प्रवृत्तिञ्च रजःकार्य्यं, मोहञ्च तमःकार्य्यं उपलक्षणार्थमेतत् सत्त्वादिकार्य्याणां, सर्वाण्यपि कार्य्याणि यथायथं सम्प्रवृत्तानि स्वतः प्रवृत्तानि सन्ति दुःखबुद्ध्या यो न द्वेष्टि, निवृत्तानि च सुखबुद्ध्या यो न काङ्क्षति, गुणातीत स उच्यते इति चतुर्थेनान्वयः । तदेवं गुणातीतस्य लक्षणमुक्त्वा तदाचारमाह,—उदासीन इति त्रिभिः,—उदासीनवत् साक्षितया आसीनः स्थितः सन् गुणैः गुणकार्य्यैः सुखदुःखादिभिः न यो विचाल्यते स्वरूपाच्च प्रचाव्यते, अपि तु गुणा एव स्वकार्य्येषु वर्त्तन्ते एतैर्मम सम्बन्ध एव नास्तीति विवेकज्ञानेन तूष्णीमवतिष्ठति परस्मैपदमार्षम् । नेङ्गते—न चलति । अपि च समेति । समे सुखदुःखे यस्य, यतः स्वस्थः स्वरूपे एव स्थितः अतएव समानि लोष्टाश्मकाञ्चनानि यस्य, तुल्ये प्रियाप्रिये सुखदुःखहेतुभूते यस्य, धीरः धीमान्, तुल्या निन्दा च आत्मनः स्तुतिश्च यस्य । अपि च मानेति । माने अपमाने च तुल्यः, मित्रपक्षे अरिपक्षे च तुल्यः, सर्वान् दृष्टादृष्टार्थान् आरम्भान् उद्यमान् परित्यक्तुं शीलं यस्य स एवम्भूताचारः युक्तः गुणातीत उच्यते ॥

उदाहृतश्लोकान् स्वयं व्याचष्टे "गुणातीत" इति । "निवृत्तगुणाभिमानः"—निवृत्तः गुणानाम् अभिमानः आरोपः यस्मात् सः । "ज्ञानिलक्षणम्"—जीवन्मुक्तादिस्वरूपम् । "अग्रे"—उत्तरभागे सप्तमपरिच्छेदे । वक्ष्यमाणयुक्त्या पूर्वोक्ताया विवेकख्यातेरसिद्ध्या मोक्षासिद्धिं शङ्कते "नन्वि"ति । "एवमपि"=विवेकख्यातेः पूर्वोक्तरीत्या अविद्याप्रतिबन्धकत्वे सत्यपि । "विवेकप्रतियोगी"ति=विवेकस्य ये प्रतियोगिनः प्रकृतितद्विकारादयः, तेषां । "आनन्त्येन"=संख्याद्यपरिच्छिन्नतया । अयमत्राशयः,—अत्र भिक्षुनये प्रकृतेस्तावत् प्रतिपुरुषं भिन्नतया परिच्छिन्नानन्तगुणात्मकतया च आनन्त्यम्, एवं महदहङ्कारतन्मात्रेन्द्रियादीनां च आनन्त्यम् ज्ञेयम् । परिदृश्यमानभूततद्विकाराणां च आनन्त्यं प्रत्यक्षादिप्रमाणसिद्धम् । प्रतियोगिज्ञानमन्तरेण भेदज्ञानासिद्धेः प्रतियोगिनाञ्च आनन्त्येन ज्ञानासम्भवात् भेदज्ञानासम्भवः, ततश्च विवेकज्ञानासिद्धिः, तद-

भाग २। Vol 2. | १३२६ मिताब्दस्य ३ यांशे JULY–SEPTEMBER 1919. | संख्या ३। No. 3.

संस्कृत–भारती ।

आंगल-भाषा-परिशिष्ट-समेता ।

त्रैमासिकी साहित्य-पुराण-दर्शन-विज्ञानात्मिका

SAMSKRITA BHARATI

WITH AN ENGLISH SUPPLEMENT,

A QUARTERLY ANGLO-SANSKRIT MAGAZINE

OF LITERATURE, SCIENCE AND ARTS.

वंग–मद्र–विहार–उत्कल–युक्तप्रदेश–आसाम–मध्यप्रदेश–विदर्भ-
वरदा–काश्मीराख्य-जनपदानां महात्मभिः शासकसङ्घैः
कृपयानुमोदिता कृतसाहाय्यका च,

मुंबई–पञ्जाम्बु–हयदराबाद–भवनगर–जनपदानां महात्मभिः
राजकीयशिक्षाधिकारिभिः कृपयानुमोदिता,

कलिकाता-मुंबइ-महीसुर-विश्वविद्यावेश्माधिकारिभिः महात्मभिः
कृपयानुमोदिता च

Patronised by the Governments of Bengal, Madras,
U. Provinces and Oudh, Behar and Orissa,
" by the Administrations of Assam, C. P. and Berar,
" " Governments of Baroda, Kashmir and Jammu.
Approved " " Education Departments of Bombay, Punjab,
Hyderabad and Bhavanagar.
and " " Universities of Calcutta, Bombay and Mysore.

संस्कृतभारती

SAMSKRITA BHARATI SUPPLEMENT.

श्रीजयदेव-चरितम् ।

(नाटकम् ।)

पात्र-परिचयः ।

पुरुषाः ।

नारायणः ।

देवशर्म्मा ।—कश्चिद् ब्राह्मणः ।

जयदेवः ।—नारायणस्य भक्तावतारः ।

पराशरः ।—जयदेवस्य सखा ।

भूदेवः ।—पुरुषोत्तमस्य प्रधानपूजकः । (पंडा)

लम्बकर्णः
वक्रतुण्डः } पुरुषोत्तमस्य पूजकौ ।

दीर्घशिखः ।—केन्दुविल्वग्रामस्य समाजनायकः ।

चन्द्रचूडः ।—दीर्घशिखस्य भ्राता ।

वराटकः
कपर्दकः } कृषकौ ।

यात्रिकाः, नाविकाः, पथिकाः, ग्रामवासिनो नराः ।

जयदेवच्छद्मा नारायणः, गोपबालकवेशो नारायणश्च ।

स्त्रियः ।

लक्ष्मीः ।

गङ्गा ।

सुव्रता ।—देवशर्म्मणः पत्नी ।

पद्मावती ।—देवशर्म्मणः कन्या ।

कात्यायनी ।—दीर्घशिखस्य पत्नी ।

पद्मावत्याः सख्यः, ग्रामवासिन्यो नार्य्यश्च ।

श्रीजयदेव-चरितम् ।

नान्दी ।

गोपीरञ्जन ! विघ्नविभञ्जन !
प्रणमति चरणयोरेषः ।
चरणनिपतिते सुकृतविरहिते
वितर कृपां परमेश ! ।
कथमधिशेषे शेषशयनमिह
जागृहि जागृहि तूर्णम् ।
अभिलषितं मम निखिलमनोरम !
किमिति करोषि न पूर्णम् ।
गोपवधूकुल- हृदयविमोहन !
धृतनववल्लववेश ! ।

प्रथमोऽङ्कः ।

प्रथमं दृश्यम्–देवशर्म्मणो गृहाङ्गणम् ।
तत्पार्श्वतश्च माधव-मन्दिरम् ॥
ततः प्रविशन्ति गृहीतकुसुम-
भाजनाः पद्मावत्याः सख्यः ।

प्रथमा ।—(द्वितीयां प्रति) सखि ! सुलोचने ! अपि जानासि कथमद्य चिरायिता सखी पद्मावतीति ?

द्वितीया ।—कथं मया ज्ञायते ? भवतु, आह्वयामि तावत् (इति करेण द्वारमाहत्य) पद्मावति ! पद्मावति !

नेपथ्ये ।—एषा आगतास्मि प्रतिपालयत ।

तृतीया ।—भवतु, लब्धं प्रतिवचनम् ।

प्रथमा ।—अपि लक्ष्यीकृतं युष्माभिरिदानीं पद्मावती अन्यथाभावमापन्नेव प्रतिभाति ?

द्वितीया ।—कथमिव ?

तृतीया ।—अहमपि तदेव वक्तुकामासम् । सेदानीं शून्यहृदयेव लक्ष्यते । आहूयमानापि किमपि हृदयेन ध्यायन्तीव नोत्तरं प्रतिपद्यते, किं नामैतस्य कारणं भवेत् ?

प्रथमा ।—अये जानामि कारणम् । पितृभ्यां वरत्वेन लब्धा सा भगवते पुरुषोत्तमाय प्रतिपादनीयेति श्रुतमस्माभिः । सापि प्राणान् श्रीमद्भगवच्चरणयोरुत्सृष्टवती प्रत्यासन्नश्च तस्याः प्रदानसमयः । एवं गते त्याज्यं तया पितृभवनम्, सेव्यश्च यावज्जीवं भगवान् पुरुषोत्तमः । अतएव सा पित्रोः स्नेहश्टङ्खलच्छेदचिन्तया वैमनस्यमुपगतेति तर्कयामि ।

तृतीया ।—अये युक्तं निरूपितं त्वया ।

द्वितीया ।—तत्तु मयापि लक्षितम् । सा खलु भगवन्तमर्चयन्त्येव कृत्स्नं दिवसं गमयति । पुरुषोत्तमेनाधिष्ठितमिव तस्या हृदयम् ।

द्वारमुद्घाट्य प्रविश्य पुष्पभाजनहस्ता—

पद्मावती ।—चिरं खलु प्रतिपालिताऽस्मि प्रियसखीभिः ।

द्वितीया ।—आगताऽसि इत्येव बहु मन्यामहे । त्वामत्र प्रतिपालयन्तीषु एवास्मासु दूरं गगनमारूढो भगवान् सहस्रकिरणः । अपि विगतानुरागाऽसि माधवपूजने ?

पद्मावती ।—(विहस्य) कथं, माधवपूजनेऽपि विगतानुरागा भवामि ।

निरन्तरं मे हृदये स देवो-
जागर्त्ति दीप्तो गगने शशीव ।
जीवामि चेद् ब्रूहि कथं भवेयं
तत्पादपूजा-विगतानुरागा ॥

अहं तदीया, हृदयं शरीरं
शान्तिश्च कान्तिश्च सुखं च दुःखम् ।

सर्व्वं तदीये चरणेऽर्पितं हि
भक्तिः परं सा भवतान्मदीया ॥
सुष्ठु तर्कितं त्वया मे विगतानुरागत्वं माधवपूजने !

द्वितीया ।—सखि ! अलं मामन्यथा गृहीत्वा । त्वं खिरायिताऽसीति परिहासेन मया भणितम् ।

पद्मावती ।—भवतु, कृतं परिहासेन आगच्छत, माधवमर्च्चयामः । (इति मन्दिर-द्वारमुद्घाट्य) अये, हसतीव भगवान् ।

यदि हससि हस त्वं हासयन् सर्व्वलोक-
ममल-हसितवीचिर्विभ्रमेतत् पुनातु ।
मम च भवति भक्तिर्नित्यमेवामलाऽस्तु
निखिलजनशरण्य ! श्रीपदे ते नमामि ॥

प्रथमा ।—एहि, पुष्पाञ्जलिं ददाम ।

इति गृहीतपुष्पाञ्जलयः

सर्व्वाः ।—नमो नमस्ते जगदीश विष्णो !
त्वत्पादयुग्मे निखिलैकलक्ष्ये,—
मनांसि नो नाथ ! सुचञ्चलानि
पुष्पैः सहैव स्थिरतां व्रजन्तु ॥

इति पुष्पाणि निक्षिप्य गायन्ति ।

गीतम् ।

जयि कुञ्जकाननचारिन्
मानससरोहंस ! लीलानिहतकंस !
राजहृदये दैत्यदमन !
शङ्खचक्रधारिन् !
शीततपन—रजतकिरणे
तव राजति किल महिमा ।
हिमाद्रिशिखरे सितहिमनिकरे
विद्यते तव गरिमा ।

मानसमवसन्नम् अन्धतमसच्छन्नम्

दिनकर इव दीपय नो

गोवर्द्धनधारिन् !

आश्रितजनशरणे नमामस्तव चरणे

वितर कृपामये, भवभयहारिन् !

(इति नमन्ति ।)

द्वितीयं दृश्यम्–देवशर्म्मणो गृहम् ।

ततः प्रविशति सचिन्तो देवशर्म्मा ॥

देवशर्म्मा ।—(परिक्रामन्) पद्मावतीमनु चिन्तयतो मे विनिद्रा यान्ति रजन्यः । हा कथं तां स्नेहप्रतिमां हृदयादुन्मूल्य विसर्जयामि ? अथवा अलमनया चिन्तया । यत् प्रतिज्ञातं तत् कर्त्तव्यमेव । (इति क्षणं परिक्रामन्) तथापि चिन्ता तुषानलज्वालेव मां दहति । न जाने, केनोदकेनायं चिन्ताग्निर्निर्व्वाप्यत इति । हा पुरुषोत्तम !

पद्मावतीं दुहितरं भवता प्रदत्तां

नूनं हि नाथ ! भवते प्रतिपादयिष्ये ।

चिन्तानलेन गुरुणा नियतं परेश

तत् किं मुधा दहसि मां कथयाशु तन्मे ॥

सुष्ठु अलूक्तं कविना,–"अर्थो हि कन्या परकीय एवे"ति ।

तदलं परकीयस्यार्थस्य स्वकीयताप्रापणचेष्टया ।

छिन्ना भवतु हृत्तन्त्रीर्भिन्नं भवतु पञ्जरम् ।

पद्मावती प्रदेयैव नात्र कापि विचारणा ॥

अतएव,

पाषाणीकृतवक्षसा ननु मया देवस्य तस्यान्तिकं

प्रापय्यातिप्रियामपि स्वतनयां शान्तिः पुनर्लप्स्यते

सङ्कल्पः कुत एष,–नास्य भवताच्छैथिल्यसम्भावना,–

हा हा हन्त गता चिराय चलिता पद्मावती, नान्यथा ॥

(इत्यक्षिणी मृजंस्तूष्णीं परिक्रम्य) एवन्तु निश्चयः कृतः । परं ब्राह्मणी कथमनुनेतव्या ? सा तपस्विनी तनयामयजीविता एतच्चिन्तयापि प्राणैर्वियुज्यमानेव लक्ष्यते । हा पुरुषोत्तम ! कथं त्वया ईदृशे सङ्कटे पातितोऽयं जनः ? (इति क्षणं सविषादं परिक्रम्य) भवतु, ब्राह्मणीमाह्वयामि । (इति पुरतो-विलोक्य) अये इयमागतैव ।

ततः प्रविशति सुव्रता ।

सुव्रता ।—अत्येति खलु अभिषेकवेला । अधुनापि इहैव वर्त्तसे ?

देवशर्म्मा ।—आस्तां तावदभिषेको भोजनं वा ।

सुव्रता ।—नाथ ! कथमेवं भाषसे ? अपि अपराद्धं मया ?

देवशर्म्मा ।—अयि सरले ! न केनाऽप्यपराद्धम् । अपराधो ममैव ।

सुव्रता ।—कथमिव ?

देवशर्म्मा ।—अयि, न स्मरसि यदनपत्यता-समुद्भवेन दुःखेन दुर्म्मनायमानाभ्यामावाभ्यां सङ्कल्पितमासीत् ?

सुव्रता ।—तदपि विस्मर्य्यते ?

देवशर्म्मा ।—पुरुषोत्तमस्य पुरतो यत् प्रतिज्ञातं तदपि स्मरसि ?

सुव्रता ।—न कथं स्मरामि ?

देवशर्म्मा ।—"भगवतः कृपया लब्धमपत्यं यावज्जीवं तस्यैव दासं कृत्वा तन्मन्दिरे रक्षिष्याव" इत्येवावयोः प्रतिज्ञासीत् ।

सुव्रता ।—अथ किम् ? परं कथमद्य पुनस्तत्कथावतारणा ? एवं कथयतस्ते वचनजातमाकर्णयन्त्या वेपते मे हृदयम् ।

देवशर्म्मा ।—वेपतां भृशं वेपताम्, शोषं वा गच्छतु धमनीषु रुधिरधारा, तथापि प्रतिज्ञातं पालनीयमेव । शृणु, अवहिता भव, दृढीकुरु हृदयम् । लब्धा कन्यका अभ्यर्थितस्य भगवतोऽनुग्रहेण, सा पुनस्तस्मै एव प्रदातव्या । तदयं समागतस्तत्प्रदानसमयः । पद्मावती दासीभावमुपेत्य यावज्जीवं पुरुषोत्तमं सेविष्यते । उपहारीकर्त्तव्यमावयोः स्नेहकुसुमं श्रीमद्भगवच्चरणसरोजयोः ।

सुव्रता ।—हा धिक्, किं मया महत् पापं कृतं पूर्वस्मिन्निह वा जन्मनि, यदियं स्नेहलता हृदयादुन्मूल्यते ? नाथ ! एतच्चिन्तयापि दीर्य्यतीव मे हृदयम् । अहो किमहं करोमि मन्दभाग्या ?

देवशर्म्मा ।—किं पुनरत्र क्रियेत ? कर्त्तव्यन्तु पूर्व्वत एव निरूपितमास्ते ।

सुव्रता ।—यदि वत्सा न प्रलर्प्यते तदा को दोषः स्यात् ?

देवशर्म्मा ।—महान् खलु दोषः । प्रतारणा,—न खलु यस्य कस्यचिदपितु सृष्टिस्थितिप्रलयहेतोर्भगवतः प्रतारणा स्यात् ।

सुव्रता ।—भवतु, तनयास्नेहव्याकुलितहृदयौ प्रतारकावेव भवावः । मर्म्मज्ञः खलु भगवान् सर्व्वं जानाति, तेन मर्षयितव्योऽयमपराधः ।

देवशर्म्मा ।—यदि मर्षयितव्यो न भवति ?

सुव्रता ।—कथमिव ?

देवशर्म्मा ।—येन सा प्रदत्ता स एव चेदिमामस्मत्त आच्छिद्य स्वयमेव प्रतिगृह्णाति ?

सुव्रता ।—शान्तं पापम् । चिरंजीवतु मे वत्सा । हा पुरुषोत्तम ! यदि पुनर्ग्रह-णीया तत् कथमियं त्वया प्रदत्ता ? अये दत्तापहारिन् ! एवं जल-बुद्बुदवत् प्रकाशस्ते कारुण्यस्य ? अथवा मन्दभाग्यायां मयि करुणामयस्यापि अकरुणता ।

देवशर्म्मा ।—अयि किमत्र विलपसि ? मयापि बहु विलपितम्, परमधुना तत्त्वं निर्णीतम् ।

यत्पादाब्जयुगप्रसेवनफलं नित्यं तपस्तप्यते
शूली शम्भुरसौ विरिञ्चिरपि स त्रैलोक्यसृष्टिप्रभुः ।
तद्दास्यं तनया लभेत यदि मे किन्नाम नाप्तं तया ?
धन्यं पूतमहो भवेदपि कुलं, किं वापरं प्रार्थ्यते ?

तदलं विलापेन, त्वरस्व, श्रीधामगमनोद्योगो विधेयः ।

सुव्रता ।—कथं, नास्त्यवकाशः कालहरणस्यापि ? हा वत्से ! त्वया वियुक्ता कथमहं प्राणान् धारयिष्यामि अयि जीवितप्रतिमे !
एतदर्थमेवालङ्कृतस्त्वया मदङ्कः ! असहनीयस्त्वया विरहः ।

देवशर्म्मा ।—प्रिये ! अलं शोकेन । आवामपि पुरुषोत्तमचरणौ शरणीकृत्य तत्रैव जीवितशेषं यापयिष्यावः ।

सुव्रता ।—आर्य्यपुत्र ! एष ते सङ्कल्पः ?

देवशर्म्मा ।—अयं मे सङ्कल्पः ।

सुव्रता ।—भवतु पुनरुज्जीवितास्मि ।

देवशर्म्मा ।—यतस्साप्यधुना धरातलमवतीर्णा लक्ष्मीरिव अनिशं माधवमर्चयन्ती कालं नयति ।

सुव्रता ।—स्वस्तु, एतावन्मात्रं जानासि । सा पुनर्माधवमयजीविता तमेव सेवते, जपति तन्नाम, निशि तमुत्स्वप्नायते च ।

देवशर्म्मा ।—अनुरूपमिदं तस्याः । अन्यथा कथं देवसेवायै तस्या जन्म भवेत् ? भवतु, गच्छाम्यहमधुना प्रस्थानोद्योगविधानाय । श्वः प्रातरेव इतः प्रस्थातव्यमस्माभिः । त्वमपि त्वरस्व । [इति निष्क्रान्तः]

सुव्रता ।—भगवन् ! ईदृशी त्वदीया इच्छा ? भवतु, इच्छामयस्य इच्छैव सफलतां गच्छतु । सर्व्वशक्तिमयेन तेनैव प्रतिनियतं परिचाल्यते जगत्,—कर्त्तृत्वाभिमानिनः अहङ्कारपरा मानवाः पुनस्तदिच्छायामावर्त्ते तृणखण्डा इव विलुप्तसत्त्वा भवन्ति । कुहकिन्या आशया मदिरयेव मत्ततां प्रापिताहं नभसि प्रासादश्रेणीम् अरचयम्, उत्स्वप्नायिता च मया काचन आनन्दपरम्परा । हन्त, सर्व्वमेकपदे विध्वस्तम् !!

पद्मावती ।—(प्रविश्य) कथं विध्वस्तं भविष्यति, अम्ब !

सुव्रता ।—(ससम्भ्रमम्) अये पद्मावति !!

पद्मावती ।—अम्ब ! अभिनन्दनीये अस्मिन्नर्थे किमिति विलपसि ?

सुव्रता ।—पुत्रि ! त्वमप्येवं भाषसे ।

पद्मावती ।—कथं पुनरन्यथा भाष्यते ? अपि सहते ते तनयाया अन्यथा भाषणम् ?

सुव्रता ।—जाते ! एवं कथयन्त्या त्वया तूष्णीम्भावं गमितास्मि ।

पद्मावती ।—किं कथयामि जननि ! हर्षोद्वेलं हृदयं मे पञ्जरं विभिद्येव वहिरागन्तुमिच्छति । यस्मिन् खलु भगवति विचिन्त्यमानेऽपि आपूर्य्यते हृदयमानन्दधारया, स खलु भगवान् पुरुषोत्तमो नयनविषयीकरणीयः । एतस्मादधिकतरः को नाम आनन्दो भवेत् ? मातस्त्वमपि तत्र गमिष्यसि ?

सुव्रता ।—अहमपि गमिष्यामि ।

पद्मावती ।—तातोऽपि गमिष्यति ?

सुव्रता ।—गमिष्यति ।

पद्मावती —तत् खलु सुष्ठु भविष्यति । तदेहि प्रास्थानिकं सर्व्वमुपकल्पयावः ।

(इति निष्क्रान्ते ।)

तृतीयं दृश्यम्–अजयतटम् ।

ततः प्रविशतो मेघाच्छन्नायां रजन्यां जयदेवः पराशरश्च ।

पराशरः ।—अये तिमिरावगुण्ठिता रजनी ! विकम्पयन्निव प्राणिनां चेतांसि जलधरो गर्जति । पुरःस्थमपि वस्तु महता कष्टेनैव दृश्यते । तत् सखे ! कथमेवंविधायां रजन्यामभिलाषस्ते अजयतटसञ्चरणाय ?

जयदेवः ।—सखे ! किमत्रोच्यते ? अजयेन सह गुम्फिता मे तास्ताः स्मृतयः ।

यथा पिपासोः सलिलं विलोक्य,–
चेतः प्रफुल्लं नरिनर्त्ति हर्षात् ।
तथा ममाप्यत्र समागतस्य
हर्षप्रकर्षो हृदयस्य कोऽपि ॥

गृहं मे स्वर्गसङ्काशमरण्यसमतां गतम् ।
किं पुनः कथ्यते मित्र ! सर्व्वं हि विदितं तव ॥

पराशरः ।—युज्यते । अरुन्तुदा हि लोकयात्रा । पुत्रो जननीशोकेन विलपति, तनयशोकविधुरा जननी वक्षस्ताडयन्ती रोदनेन दिशो बधिरयति, पत्नी च पतिवियोगविह्वला अश्रुधारया धरातलमभिषिञ्चति । एते खलु अनतिक्रमणीया विधेर्विधयः । तदनतिक्रमणीये अस्मिन्नर्थे किमिति शोकस्य वशं गच्छसि ? एहि कियच्चिरमुपविशाव: ।

(इत्युपविशतः ।)

जयदेवः ।—पराशर ! पश्यसि अमुं चूततरुम् ?

पराशरः ।—सखे ! पश्यामि ।

जयदेवः ।—अस्यैव मूले—

जननी मद्गतप्राणा वात्सल्यरसदीर्घिका ।
देवीव सा मया हन्त, चितायां भस्मसात् कृता ।

पराशरः ।—(मेघगर्ज्जितमाकर्ण्य) अहो, दारुणो जलधरनिर्घोषः ।

जयदेवः ।—मम हृदये पुनर्दारुणतरः । (इत्युत्थाय)

हंहो मेघ ! स्तनय नियतं कम्पयंश्चेतनानां
चित्तानि त्वं, तव पुनरहो निष्फलोऽयं प्रयत्नः ।
मेघो योऽयं रसति हृदये सर्व्वदा मामकीने,
का ते शक्तिस्तमतिशयितुं तत् कृतं गर्ज्जनेन ॥

पराशरः ।—सखे ! वर्द्धते तमिस्रा । तत्र कथं गृहं गम्यते ?

जयदेवः ।—पराशर ! न प्रसरतो मे चरणौ, शून्यं गृहं व्यात्तं पिशाचवदनमिव प्रतिभाति । न खलु पुनर्जननी बाहू प्रसार्य्य गृहगतं मां प्रत्युद्गमिष्यति ।

पराशरः ।—सखे ! पर्य्यवस्थापयात्मानम् ।

जयदेवः ।—अये, पर्य्यवस्थापित एवायम् । अन्यथा कथं जयदेवो जीवति ? (आकर्ण्य) कथं, रोदनध्वनिरिव !

पराशरः ।—श्मशाने कोऽपि शोककातरो भवेत् ।

जयदेवः ।—हन्त, ज्ञातम् । अये रुदिहि रुदिहि, रोदनेन विदारय नभः । तथापि गतो न प्रत्यागमिष्यति । यो गतः, स तु चिराय गतः ।

पराशरः ।—सखे ! प्रवृद्धयामा शर्व्वरी, विद्योतते विद्युत्, घनीभवन्ति च मेघाः । तस्मात् परमत्रावस्थातुं युज्यते ।

जयदेवः ।—भवतु, गच्छावः । (इति निष्क्रान्तौ ।)

चतुर्थं दृश्यं–पुरुषोत्तममन्दिरम् ।

पुरुषोत्तमस्य पुरतो भूदेवो यात्रिकाश्च ।

भूदेवः ।—एष भगवान् सृष्टिस्थितिप्रलयहेतुः पुरुषोत्तमः । तद् भगवतो दर्शनेन कृतार्थयत नरजन्म ।

प्रथमो यात्रिकः ।—आर्य्य ! क्वासौ भगवान् ? न खलु पश्यामि ।

भूदेवः ।—अये, तव पुरत एव ।

प्रथमो यात्रिकः ।—मन्दिरं शून्यमवलोकयामि ।

द्वितीयो यात्रिकः —कथं, न पश्यसि सुभद्राबलभद्रसहायं भगवन्तं वैकुण्ठपतिम् ?

भूदेवः ।—अरे, किं चिन्तयन्नत्रागतोऽसि ?

प्रथमो यात्रिकः ।—वत्सा मे श्वशुरालयं गता । अत्रागच्छतो मे मनसि तया शून्यस्य गृहस्यैव चिन्ता प्रादुरासीत् । अहो वैमुख्यं दैवस्य, यदेतस्मादेव कारणाद् भगवानपि मे दर्शनं न ददाति । आर्य्य ! आर्य्य ! का गतिर्मे भविष्यति ?

भूदेवः ।—अये बुद्धम् ! भवतु, कृतस्नानो भगवन्तमेव अवहितेन मनसा चिन्तयन् पुनरत्रागच्छ । भविष्यति भगवद्दर्शनम् । अपि यूयं पश्यथ भगवन्तम् ?

अपरे ।—अथ किम् ?

तृतीयो यात्रिकः ।—आर्य्य ! अहन्तु न पश्यामि ।

भूदेवः ।—त्वया पुनः किं दृश्यते ?

तृतीयो यात्रिकः ।—मया इक्षुक्षेत्रं विलोक्यते ।

भूदेवः ।—त्वया का चिन्ता कृता ?

तृतीयो यात्रिकः ।—मयि अनुपस्थिते, इक्षुक्षेत्रं मे शृगालैर्भक्षितं भविष्यतीति चिन्तया पीड्यमानमतिरत्रागतोऽस्मि ।

भूदेवः ।—भवतु, त्वमपि कृतस्नान आगच्छ ।

तृतीयो यात्रिकः ।—आर्य्य ! भविष्यति भगवद्दर्शनम् ?

भूदेवः ।—भविष्यति । सर्व्वे अञ्जलिं बद्ध्वा पठत । "नमो ब्रह्मण्यदेवाय —"
(सर्व्वे तथा पठन्ति)

भूदेवः ।—"गोब्राह्मणहिताय च" । (सर्व्वे पठन्ति)
"जगद्धिताय कृष्णाय" (सर्व्वे पठन्ति)
"गोविन्दाय नमोनमः" ॥ (सर्व्वे पठन्ति)

ततः प्रणमत भगवन्तम् । (सर्व्वे प्रणमन्ति ।) पुनर्बद्धाञ्जलयः पठत । (इति पश्चः कथयति सर्व्वे च पठन्ति ।)

"पापोऽहं पापकर्माहं पापात्मा पापसम्भवः ।
त्राहि मां पुण्डरीकाक्ष ! सर्व्वपाप-हरो भव ॥"

अधुना दक्षिणां यच्छत ! (सर्व्वे ददति ।) भगवतो महाप्रसादं गृह्णीत, खादत, खादयत च । (इति ददाति, सर्व्वे गृह्णन्ति ।)

चतुर्थोयात्रिकः ।—(विलोक्य) कथमन्नम् !!

पञ्चमोयात्रिकः ।—अथ किम् ? भुङ्क्ष्व । (इति खादयितुमिच्छति ।)

चतुर्थोयात्रिकः ।—(अपगच्छन्) अरे अपसर अपसर; शूद्रोऽसि शूद्रोऽसि; नाहं ब्राह्मणो भूत्वा शूद्रस्पृष्टमन्नं भक्षयिष्यामि!

भूदेवः ।—अरे भुज्यतां भुज्यताम् । महता पुण्येनायं महाप्रसादो लभ्यते । अस्मिन् पुण्यक्षेत्रे जातिविचारो नास्ति । कुक्कुरस्यापि मुखाद् गृहीत्वा भोक्तव्योऽयं महाप्रसादः ।

पञ्चमोयात्रिकः ।—अपि श्रुतम् ? (सर्व्वे खादन्ति खादयन्ति च ।)

भूदेवः ।—सर्व्वे अवगाह्य देहस्य चित्तस्य च मालिन्यमपनयत, घोषयत च भगवतो जयम् ।

सर्व्वे यात्रिकाः ।—जय पुरुषोत्तम ! जय जनार्दन ! जय दामोदर ! जय जगन्नाथ !

(इतिनिष्क्रमितुमिच्छन्ति)

(ततः प्रविशतो वक्रतुण्डो लम्बकर्णश्च ।)

उभौ—अरे अपसरत अपसरत । अन्तरमन्तरम् । अरे क गम्यते ? अरे अस्माकं दक्षिणामदत्त्वा क गम्यते ?

कश्चिद् यात्रिकः ।—कथं, युवाभ्यामपि पुनर्दक्षिणा प्रदातव्या ?

वक्रतुण्डः ।—न कथं प्रदातव्या ?

लम्बकर्णः ।—नेच्छथ चेन्न दीयताम् । परमावाभ्यां दक्षिणा चेन्न दीयते (इत्यङ्गुष्ठं दर्शयन्) तदा न लप्स्यते भगवद्दर्शनपुण्यम् ।

चतुर्थो यात्रिकः ।—का पुनर्युवयोर्दक्षिणा ?

वक्रतुण्डः ।—या रोचते युष्मभ्यम् ।

सर्व्वे ।—भवतु, दीयते (इति ददति ।)

प्रथमो यात्रिकः ।—तत्पुण्यम् भूतम् ?

वक्रतुण्डः ।—भूतम्, गच्छत । (यात्रिका निष्क्रान्ताः ।)

लम्बकर्णः ।—अरे कियल्लब्धम् ?

वक्रतुण्डः ।—सपादमाणकद्वयम् । त्वया कियल्लब्धम् ?

लम्बकर्णः ।—मया तु सार्द्धमाणकत्रयं लब्धम् ।

वक्रतुण्डः ।—अरे बहु लब्धं त्वया ।

लम्बकर्णः ।—न कथं बहु लब्धं भविष्यति ? पण्डितः खलु अहम्, पण्डितेन बहु लब्धव्यमेव ।

वक्रतुण्डः ।—कथं पाण्डित्यमपि त्वयि वर्त्तते ?

लम्बकर्णः ।—न कथं वर्त्तिष्यते ? मातुलो मे पण्डितः । जानास्येव "नराणां मातुलक्रमः" इति । मयापि व्याकरणं काव्यञ्चाधीतम् ।

वक्रतुण्डः ।—तद्वैयाकरणः साहित्यिकश्च भवान् । भवतु, प्रश्नं ते ददामि ।

लम्बकर्णः ।—अहमपि उत्तरं ददामि ।

वक्रतुण्डः ।—कथय, व्याकरणस्य किं प्रथमं सूत्रम् ।

लम्बकर्णः ।—"अकः सवर्णे——" नहि नहि "अपादाने पञ्चमी" अरे, नहि नहि "मुनित्रयं पुरस्कृत्य——" (इति शिरः कण्डूयंश्चिन्तयति ।)

वक्रतुण्डः ।—ततस्ततः ।

लम्बकर्णः ।—अतः परं तु विस्मृतम् । भवतु, काव्यस्य प्रश्नं देहि ।

वक्रतुण्डः ।—हितोपदेशं पठितम् ?

लम्बकर्णः ।—(सगर्व्वम्) हुं, पठितम् ।

वक्रतुण्डः ।—कस्तस्य प्रथमः श्लोकः ?

लम्बकर्णः ।—न स्मरामि,—अरे स्मृतः स्मृतः ।

वक्रतुण्डः ।—तत् कथय ।

लम्बकर्णः ।—"असारे खलु संसारे सारं श्वशुरमन्दिरम् ।"

वक्रतुण्डः ।—अहो पाण्डित्यम् ! अपि अपरं किमपि शास्त्रं जानासि ?

लम्बकर्णः ।—अथ किम् ? जीर्णं मया ज्योतिषं शास्त्रम् ।

वक्रतुण्डः ।—तत् कथय, का तिथिरद्य ।

लम्बकर्णः ।—(अङ्गुल्या गणयन्) त्रयोदशी, चतुर्द्दशी, पञ्चदशी, षोडशी—अरे अद्य सप्तदशी ।

वक्रतुण्डः ।—अहो भीषणं पाण्डित्यं भवतः !!

लम्बकर्णः ।—अरे यात्रिका आगच्छन्ति ।

(ततः प्रविशन्ति देवशर्म्मा, सुव्रता, पद्मावती च ।)

लम्बकर्णः ।—इत आगच्छत, इत आगच्छत । अयं भगवान् पुरुषोत्तमः । अहं दर्शनं कारयामि । इतः इतः ।

सुव्रता ।—आर्य्यपुत्र ! वेपते मे हृदयम् ।

देवशर्म्मा ।—कथं, वेपते नाम ?

पद्मावती ।—मम पुनरुल्लासो हृदयस्य ।

सुव्रता ।—हा पुत्रि ! हा पुरुषोत्तम ! (इति पुरुषोत्तमविग्रहमुपसर्पन्ति ।)

भूदेवः ।—प्रणमन्तु सर्व्वे भगवन्तम् । (सर्व्वे प्रणमन्ति ।)

देवशर्म्मा ।—नमामि पद्मायतचारुनेत्र !

जनार्द्दन ! त्वां जगदेकपात्र !

समागतोऽयं तव दासदासः

स्नेहस्य नैवेद्यमियं पुरःस्था ॥

पद्मावती मम प्रभो ! हृदयस्य सौख्यं
बुभ्री तृषा जठरमहो नयने च निद्रा,—
त्वत्पादपद्मयुगले कुसुमीकृताच
दासीमयेऽखिलपते ! तदिमां गृहाण ॥

भूदेवः ।—कथमियं देवदासी करणीया ?

देवशर्म्मा ।—आर्य्य ! एवमेव ।

सुव्रता ।—भगवन् !

लब्धा कन्या तव हि कृपया तुभ्यमेव प्रदत्ता
जीव्यात् सा मे सुचिरमनघा त्वत्पदं सेवमाना ।
लब्धा येयं सलिलकणिका वारिधेर्हन्त दैवात्
तृष्णाच्छेदो न खलु विहितः सा पुनस्तत्र विष्टा ॥

जम्बकर्णः ।—अये, विस्मयेन अचेतनतां गतमिवात्मानं मन्ये ।

वक्रतुण्डः ।—मूर्ख ! आकर्णय तावत् ।

पद्मावती ।—(अञ्जलिं बद्ध्वा)

पिता पितेव सा चापि जननी जननीव मे ।
ताभ्यामद्य प्रदत्तां मां गृहाण जगदीश्वर ! ।
नदीषु वह्नौ कुसुमे फले च
विराजते ते महनीयदीप्तिः ।
कृत्स्नञ्च विश्वं भवतो विभूति-
र्दासी त्वदीये चरणे विनम्रा ॥
बह्व्योऽपि बालास्तव पादयुग्मं
प्रसेव्य प्राप्ता हि पदं महीयः ।
अहं भवन्तं शरणं गताद्य
गतिर्विधेया मम सैव नान्या ॥
नमामि मातश्चरणाम्बुजे ते
पितस्तवाहं चरणौ नमामि ।
आपृच्छते वां तनया सबाष्प-
माशीर्भिरेव खलु वर्द्धनीया ॥

सुव्रता ।—(पद्मावतीमालिङ्ग्य)

हा पुत्रि ! मद्गतप्राणे ! हा वत्से ! जीवितोपमे !
एकाकिन्या विहायास्मान् का दशा ते भविष्यति ?

पद्मावती ।—अम्ब ! किमित्यनर्थकं चिन्तयसि ?

जगन्नाथस्य पादाब्जयुगसेवनतत्परा,
तनया ते सनाथापि कथमेकाकिनी भवेत् ?

देवशर्म्मा ।—भवतु भवतु भाव्यं कोहि नामात्र खेदः ?

टलति, टलतु विश्वं का हि नामात्र भीतिः ?
चलति-चलतु वरेला विश्वनाथस्य दासी
विकिरतु वरदो मे मानसे रुद्रशक्तिम् ॥
आर्य्ये ! किमतः परं करणीयम् ?

भूदेवः ।—अपि दृढीकृतं चेतः ?

देवशर्म्मा ।—आर्य्यं ! किमन्यत् कुलिशतां नीतम् ।

भूदेवः ।—तदधुना सर्व्वे गच्छन्तु भवन्तः, निशायां स्वप्ने देवादेशो ज्ञातव्यः ।

देवशर्म्मा ।—भवतु,एवं कुर्म्मः । पद्मावति ! तदेहि कियच्चिरं पुनरस्मदीया पद्मासि ।

पद्मावती ।—तात ! चिरायैव युष्मदीया खल्वहम् ।

(इति देवशर्म्मा, सुव्रता, पद्मावती च निष्क्रान्ता ।)

लम्बकर्णः ।—(कियच्चिरं तन्मार्गमवलोक्य) कथम्, दक्षिणामदत्त्वैव गताः ! !

वक्रतुण्डः ।—न कथं त्वया मार्गरोधः कृतः ?

लम्बकर्णः ।—अरे विस्मयेन व्यात्तवदनः अपगतरुत्त इवाहमासम् । तद् त्वयापि किं न मार्गरोधः कृतः ?

वक्रतुण्डः ।—अरे न पारितं मया ।

लम्बकर्णः ।—भवतु, अन्ये यात्रिका आगच्छन्तु । वीरेणेव मया तान् गले मोटयित्वा ग्रहीतव्या दक्षिणा । (इति परिक्रामतः ।)

पञ्चमं दृश्यम्—वैकुण्ठधाम ।

(ततः प्रविशति भगवान् नारायणः ।)

नारायणः ।—अयि क्षीराब्धितनये !

लक्ष्मीः।—(प्रविश्य) कथं लोकनाथः। इयमस्मि। कथं पुनरद्य भगवतो लोकपालनकार्य्यमुज्झित्वा क्षीराब्धितनयायामेतावती अनुकम्पा?

नारायणः।—(सहासम्) कमलालयायाः कथं पुनः कमलानि विहाय इहागमनम्?

लक्ष्मीः।—अये, अनन्तशक्तेर्लोकनाथस्य आह्वानमुपेक्ष्य को नाम अन्यत्र स्थातुं शक्नुयात्?

नारायणः।—भवतु, तिष्ठतु परिहासः।

लक्ष्मीः।—किं पुनर्वक्तुकामोऽसि?

नारायणः।—त्वामाप्रष्टुं समागतोऽस्मि।

लक्ष्मीः।—आप्रष्टुम्!! कथमापृच्छ्यतेऽयं जनः? न खलु कुत्रचित् प्रचलितोऽसि।

नारायणः।—अये, प्रचलित एवास्मि।

लक्ष्मीः।—क्व तावत्? क्षीरोदशयनाय?

नारायणः।—नहि नहि।

लक्ष्मीः।—तत् किं दैत्यविमर्द्दनाय?

नारायणः।—क्व नाम ते दैत्याः? अमरालये तेषां नामापि नास्ति। कुलिशभयविधुराः सर्व्वे एव ते दिगन्तेषु विलग्नाः।

लक्ष्मीः।—तत् किं पुनराभीरलीला करणीया?

नारायणः।—अयि कातरे! न तावत्। अहं खलु पृथिव्यै प्रस्थितोऽस्मि।

लक्ष्मीः।—किमित्युपहससि? सदैव उपहासो न मे रोचते।

नारायणः।—प्रिये! नायमुपहासः। तत्त्वत एव प्रचलितोऽस्मि।

लक्ष्मीः।—कथं तत्त्वत एव?

नारायणः।—अथ किम्?

लक्ष्मीः।—तत् कथमयमाकस्मिकः प्रयत्नः?

नारायणः।—अपि स्मरसि मदंशेनावतीर्णं जयदेवं, त्वदंशेनावतीर्णां पद्मावतीञ्च?

लक्ष्मीः।—स्मरामि। किं तयोः?

नारायणः।—पद्मावत्याः पिता पूर्व्वप्रतिज्ञामनुस्मृत्य तनयां दास्येन मह्यमर्पयितुं सपत्नीकः पुरीतीर्थं समागतः।

लक्ष्मीः।—ततस्ततः।

नारायणः।—अधुना स्वप्ने मदादेशं जिज्ञासवस्ते सर्व्वे पुरीमेव अध्यासते।

लक्ष्मीः।—अये, एतदर्थमेव भूलोकाय प्रस्थितोऽसि? तत् को नाम आदेशो भवतः?

नारायणः ।—यथा प्रागेव विचिन्तितस्तादृश एव ।

लक्ष्मीः ।—भवतु, लब्धं स्वास्थ्यम् । मया पुनः सांवत्सरिकी विरहकल्पना कृताऽभूत् । तत् का नाम वार्त्ता साम्प्रतं जयदेवस्य ?

नारायणः ।—स तु ग्रन्थनियोजितचित्तो वीतचिन्तः कालं नयति ।

लक्ष्मीः ।—तत् कदा गम्यते ?

नारायणः ।—अधुनैव ।

लक्ष्मीः ।—कथमधुनैव !! भवतु तावत् । सुखिता भवतु पद्मावती । तत् पृथिवीं प्राप्य त्वया विलम्बो न करणीयः ।

नारायणः ।—कथं, विलम्बोऽपि क्रियेत ? (इति निष्क्रान्तः ।)

लक्ष्मीः ।—शिवास्ते सन्तु पन्थानः । अथवा त्रिलोकीनाथस्य किमशिवं नाम ?

(इत्यन्यतो निष्क्रान्ता ।)

षष्ठं दृश्यम्—अजयतटम् ।

(ततः प्रविशतः कृषकौ ।)

प्रथमः ।—अरे वराटक ! अपि चिपसि नभसि दृष्टिम् ?

वराटकः ।—हुं कपर्दक ! अद्य प्रातरेव गगनं मेघैराच्छाद्यते । महानद्य भविष्यति धारासम्पातः ।

कपर्दकः ।—तथैवानुमीयते । अस्मिन् वर्षे देवः पुनरुक्तमिव वर्षति ।

वराटकः ।—अरे वर्षतु नाम । केवलं मा भूदतिवृष्टिः ।

कपर्दकः ।—शस्यस्य तु कीदृशी दशा अनुमीयते ?

वराटकः ।—यदि अतिवृष्टिर्न भवेत् तदा आसादयेम प्रभूतं शस्यम् ।

कपर्दकः ।—यदि पुनरतिवृष्टिरेव भवेत् ?

वराटकः ।—तदा प्लावितायां भूमौ निराहारैर्वर्त्तितव्यम् ।

कपर्दकः ।—एवम् ?

वराटकः ।—एवमेव । शस्यञ्चेन्न जायते तदा कथमापूरयिष्यामोऽवदनविवरम् ?

कपर्दकः ।—(वात्यास्पर्शमनुभूय) कथं वात्यापि !

वराटकः—अये महती वात्या समुपस्थिता । वात्याविताड़िताःतरवः शाखाग्रैर्भूमिमिव स्पृशन्ति !

कपर्दकः ।—सूर्य्यस्यापि नास्ति प्रकाशः !

वराटकः ।—ईदृशेऽपि दुर्दिने सूर्य्यस्य प्रकाशमाशंससे ? मेघैरवरुद्धस्तत्-प्रकाशमार्गः ।

कपर्द्दकः ।—तदलमद्य शस्यक्षेत्रं गत्वा । एहि गृहं प्रतिगच्छावः ।

वराटकः ।—अरे कृषीवलैर्न भेतव्यं मेघाद् वायोर्व्वा ।

कपर्द्दकः ।—एवं कृते किं भवेत् ?

वराटकः ।—मूर्ख ! बुभुक्षया मरणं भवेत् ।

कपर्द्दकः ।—तत् कथं न सुखमयं वाणिज्यं क्रियते ? मया च पितामहादाकर्णितं "वाणिज्ये वसते लक्ष्मी"रिति ।

वराटकः ।—सत्यमेतत् । किन्तु विपुलं धनमन्तरेण कथं वाणिज्यं क्रियते ।

कपर्द्दकः ।—हुं बुद्धम् । एतदर्थमेव कृषका वाणिज्यं न कुर्व्वन्ति ।

वराटकः ।—अपरञ्च, वाणिज्ये यावद्धनं लभ्यते तदर्द्धं कृषिकर्म्मण्यपि लभ्यते । उक्तञ्च "तदर्द्धं कृषिकर्म्मणी" ति ।

कपर्द्दकः ।—आः वात्या गात्रचर्म्म विध्यतीव ।

वराटकः ।—हुं, देवो युगान्तलीलामिव कर्त्तुमुद्यतः । अजयस्य जलमपि वेलामुत्-क्रम्य उच्छलति । तदेहि क्षेत्रमेव गच्छावः ।

कपर्द्दकः ।—वराटक ! वराटक ! नौरिवागच्छन्ती लक्ष्यते ।

वराटकः ।—मृत्पिण्डबुद्धेरन्यः को नाम नाविक ईदृशे दुर्द्दिने नावं चालयेत् ?

(इति निष्क्रान्तौ)

नेपथ्ये ।—एकः ।—गता गता ।

अपरः ।—न भेतव्यं न भेतव्यम् ।

(तत आर्त्तकलकलः श्रूयते ।)

(ततः प्रविशन्ति नावमधिरुह्य देवशर्म्मा, सुव्रता, पद्मावती, नाविकाश्च ।)

देवशर्म्मा ।—अरे गता गता । तीरं——तीरमभि——"

नाविकः ।—अवसीदतो हस्तौ ।

अपरः ।—कियच्चिरं नरो युध्येत स्रोतसा वात्यया च ?

पद्मावती ।—तात ! तात ! अम्ब !

देवशर्म्मा ।—मा भैषीः मा भैषीः । अरे त्वरितं त्वरितम्——"

नाविकः ।—व्यर्थो व्यर्थः प्रयत्नः । देवो रक्षकः ।

सुव्रता ।—हा देव ! हा पुरुषोत्तम !

देवशर्म्मा ।—अरे न पारितं, न पारितम् ?

नाविकः ।—न पारितम् । यतध्वं यतध्वं प्राणरक्षायै ।

सुव्रता ।—अयि प्राणसमे ! पद्मा ——"

नाविकः—भयमावर्त्तो—भीषणः—भीषणः ।

अपरः । भग्नो भग्नः कर्णः ।

देवशर्म्मा ।—हा हा मग्ना—मग्ना । वत्से ! पद्मा ——"

(नौर्निमग्ना, सर्व्वे उन्मज्जन्ति निमज्जन्ति च । ततो वेगेन प्रविशतो जयदेव-पराशरौ ।)

जयदेवः ।—पराशर ! पराशर ! इत एव, इत एव ।

पराशरः ।—इयं भग्ना तरणी, निमज्जन्ति नराः ।

जयदेवः ।—त्वरितं त्वरितमेहि । यावच्छक्यं यतावहे ।

(इति लम्फतः । ततः कियच्चिरेण जयदेवः पद्मावतीं, पराशरो देवशर्म्मां च सुव्रतां गृहीत्वा तीरमागताः ।)

पराशरः ।—भवतु, लब्धं साफल्यम् ।

जयदेवः ।—बहु मन्तव्यं हि तत् ।

सुव्रता ।—हा कथमेषा मन्दभागिनी सलिलादुत्थापिता ? का दशा मे वत्सायाः समापतिता ? कच्चिज्जीवति सा ?

देवशर्म्मा ।—इयं सा तीरं प्रापिता महाभागेन । तत् पर्य्यवस्थापय आत्मानम् ।

सुव्रता ।—इयं सा ? जाते ! जाते ! पद्मावति !—कथम्, उत्तरं न प्रतिपद्यते । हा दैव ! इदं ते मनोगतमासीत् ?

जयदेवः ।—आर्य्ये ! मा भैषीः ।

आवर्त्तसम्भ्रमत्रस्ता जातेयं गतचेतना ।
अचिरेणैव संज्ञाञ्च लप्स्यते, नात्र संशयः ॥

पराशरः ।—त्वमेतान् सर्व्वान् मदीयं निकेतनं प्रापयितुं यतस्व । अहं वैद्यमाहूय तत्रैव युष्मान् द्रक्ष्यामि । (इति निष्क्रान्तः ।)

पराशरः ।—आर्य्ये ! अपि वहति श्वासः ?

देवशर्म्मा ।—तथैवेत्यनुमीयते ।

सुव्रता ।—वत्से ! पद्मावति !

पराशरः ।—अलमाह्वानेन । अचिरेणैव प्राप्तचेतना भविष्यति ।

देवशर्म्मा ।—भद्र ! मङ्गलमयो युवयोर्मङ्गलं विदधातु । एतत्तु पृच्छामि, कौ पुनर्भवन्तौ, याभ्यां पुनर्जीवनं लम्भिता वयमिति ।

पराशरः ।—एतद्ग्रामनिवासिनौ ब्राह्मणावावाम् ।

देवशर्म्मा ।—न केवलं ब्राह्मणकुलस्य भूषणभूतौ भवन्तौ, भवादृशैर्महात्मभिर्गौरवं नीतं पवित्रीकृतञ्च धरातलमपि । किमपरम् —

धन्या हि गौरववती जननी वरेण्या-
कीर्त्तिप्रभाप्रमुदितो जनकोऽपि धन्यः ।
एतादृशाः सहृदया बत भूषयन्ति
अन्या च यत् कुलमहो तदपीह धन्यम् ॥

तत् पुनर्महाभागौ नामधेयतो ज्ञातुमिच्छामि ।

पराशरः ।—अहं विप्रकुलोद्भूतो नाम्ना चापि पराशरः ।
जयदेवश्च मे मित्रं द्विजो गोस्वामिशब्दभाक् ॥

सुव्रतादेवशर्म्माणौ ।—(साश्चर्यम्) कथमयं जयदेवः !!!

पद्मावती ।—अम्ब ! क्नु खलु वर्त्तसे ?

सुव्रता ।—इयमालपति । एषास्मि वत्से ! कथं पुनरपि निमीलितनयना संवृत्ता ?

देवशर्म्मा ।—प्रत्यासीदति चेतना ।

पराशरः ।—प्राप्तावसर एतत्तु पृच्छामि, कथं जयदेवनामश्रवणमात्रत एव सुमहान् विस्मयः प्रकटितो भवद्भ्यामिति ।

देवशर्म्मा ।—भद्र ! महतीयं कथा । तद् यदि नान्यथा मन्यसे तदितः परं कथयिष्यामि ।

पराशरः ।—भवतु तत् । अलं पुनर्विलम्बेन, गृहमेव गच्छामः । इयञ्च कातरा वर्त्तते । मित्रेणापि मे आहूतवैद्येन उत्कण्ठितेन भवितव्यम् ।

देवशर्म्मा ।—तथैव क्रियताम् । इयमचेतना पुनः कथं नीयते ?

सुव्रता ।—आवाभ्यामेवैषा वोढुं शक्या ।

देवशर्म्मा ।—तदेव कुर्व्वः । भद्र ! गच्छाग्रतः । (इति सर्व्वे उत्तिष्ठन्ति)

सप्तमं दृश्यम्—जयदेवभवनम् ।

(ततः प्रविशति श्रीमद्भगवद्गीतां पठन् जयदेवः ।)

जयदेवः ।—शास्त्राणां पठनं, वदन्ति गुरवश्चेतस्तमिस्रापह-
महानेत च नष्टनिष्फलदृशां ज्ञानाञ्जनं नेत्रयोः ।

तत् किं हन्त सदा मदीयहृदयं सन्देहपर्य्याकुलं
तथ्यातथ्यविचारशक्तिरहितं भ्रान्तञ्च दोलायते ?

(इति विचरन् पठति ।)

"न कर्म्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
न च सन्न्यसनादेव सिद्धिं समधिगच्छति ॥"

अत्रैव सन्देहसागरः प्लावयति मामूर्म्मिमालया । (विलोक्य) कथं, पराशरः ?

पराशरः ।—(प्रविश्य) अथ किम् ? पराशर एवास्मि । किं नाम पठसि ?

जयदेवः ।—सखे ! श्रीमद्भगवद्गीतां पठामि । अथान्यतया च मे पठतश्चित्तं सदैव सन्देहैराकुलीक्रियते ।

पराशरः ।—को नाम सन्देहः ?

जयदेवः ।—शृणु, अधुनैवं पठितं मया "न कर्म्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुत" इति । एतत्तु मया नावधारयितुं शक्यते, नैष्कर्म्यंलिप्सुनापि कथं कर्म्म प्रारब्धव्यमिति ।

पराशरः ।—कथमनारब्धकर्म्मणोऽपि कर्म्मसन्न्यासः सङ्गच्छते ? अविद्यमानपि पदार्थं विहातुं को नाम शक्नुयात् ?

जयदेवः ।—"प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ।" यदि कर्म्म सन्न्यसनीयमेव तत् कथं पुनस्तस्य ग्रहणम् ? आदौ ग्रहणं, पश्चात् सन्न्यासः,—इतस्तु अग्रहणमेव श्रेयः ।

पराशरः ।—न तावत् । कर्म्मण्यक्रियमाणे चित्तस्य शुद्धिर्न जायते । अशुद्धचित्तस्य पुनर्ज्ञानलाभसम्भावनापि दूरापास्ता । तत् चित्तशुद्ध्यर्थं कर्म्म करणीयमेव ।

जयदेवः ।—तथात्वे कर्म्म कुर्व्वतश्चित्तशुद्धौ सत्यां तत्-सन्न्यासो विधेय इत्येव श्लोकार्थ इति प्रतिभाति ।

पराशरः ।—इत्येव श्लोकार्थः । यथा कुत्रचिज्जिगमिषुभिरस्माभिः पथा गम्यते । किन्तु नैव पन्थानमुद्दिश्य गम्यते । तथैव कर्म्मसन्न्यासार्थिभिः कर्म्म क्रियते । कर्म्मकरणन्त्वनुद्दिष्टमेव, किं बहुना, कर्म्मकरणं कर्म्मसन्न्यासस्यैव पन्थाः ।

जयदेवः ।—तिष्ठतु शुष्कतर्कः । अहन्तु भक्तिमेव गरीयसीं मन्ये, सुगमः खलु भक्तिमार्गः ।

पराशरः ।—तत्र कः सन्देहः ?

जयदेवः ।—हुम् ।

पराशरः ।—सखे ! इतःपरं तु पृच्छामि, का खलु वार्त्ता तत्रभवतो देवशर्म्मणस्तनयायाः इति ।

जयदेवः ।—तत्र यीतचिन्तो भव । विधातुः प्रसादात् सा स्वास्थ्यमापन्ना ।

पराशरः ।—कृतज्ञः खलु देवशर्म्मा त्वयि ।

जयदेवः ।—केवलं मय्येव ? भवतु, किं तेन ?

पराशरः ।—न किमपि । एवं कथयामि । त्वया पुनः—"(इत्यर्द्धोक्ते विरमति ।)

जयदेवः ।—किमिति विवक्षुरपि विरमसि ?

पराशरः ।—एतत्तु पृच्छामि, त्वया पुनर्गृहाश्रमप्रवेशो न कर्त्तव्यः ?

जयदेवः ।—सखे ! कथमयमाकस्मिकः प्रश्नः ?

पराशरः ।—न खलु आकस्मिकः । तत् किं चिरकुमार एव स्थास्यसि ?

जयदेवः ।—का हानिः ? मुक्तपक्षो विहङ्गम इव यथेच्छं जीवामि । तदलमात्मानं परिणयबन्धनेन नियम्य । को नाम वृथैव महान्तं कार्य्यभारं वोढुमभिलषेत् ?

पराशरः ।—सखे ! न सम्यगवबुध्यसे । न खलु वृथैव विवाहः क्रियते । इदानीमेव पठितं त्वया, "न कर्म्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते" इति ।

जयदेवः ।—यदि तर्कः क्रियेत तदा परास्तः स्याम् । कथं पुनरद्य भवानादृतस्ते अस्मिन् विषये ? न कथं स्पष्टं कथयसि ?

पराशरः ।—भवतु, स्पष्टं कथयामि ।

जयदेवः ।—कथ्यताम् ।

पराशरः ।—अद्याहमभ्यर्थितो देवशर्म्मणा—"

जयदेवः ।—किमिव ?

पराशरः ।—"भवतः अभ्यर्थनायै ।

जयदेवः ।—मम ? न खलु अवधारयामि, कथमसौ मामभ्यर्थयते ?

पराशरः ।—स भवान् भवन्तं जामातृत्वेन लब्धुमिच्छति ।

जयदेवः ।—माम् ? जामातृत्वेन ? सखे ! अपि व्यवस्थितचित्तोऽसि ? कच्चिद्-विकला मे श्रुतिः ?

पराशरः ।—अथ किम् ? किमित्युद्भ्रान्त इव भवसि ? उद्विग्नं मे चेतस्त्वामेतद-वस्थं विलोकयतः ।